८६० ,, कुमत्यै नमः
८६१ ,, कुलश्रेष्ठायै नमः
८६२ ,, कुलचक्रपरायणायै नमः
८६३ ,, कूटस्थायै नमः
८६४ ,, कूटदृष्टयै नमः
८६५ ,, कुन्तलायै नमः
८६६ ,, कुन्तलाकृत्यै नमः
८६७ ,, कुशलाकृतिरूपायै नमः
८६८ ,, कूर्चबीजधरायै नमः
८६९ ,, क्वै नमः
८७० ,, कुंकुंकुंकुंशब्दरतायै नमः
८७१ ,, क्रुंक्रुंक्रुंक्रुंपरायणायै नमः
८७२ ,, कुंकुंकुंशब्दनिलयायै नमः
८७३ ,, कुक्कुरालयवासिन्यै नमः

८७४ ॐ कुक्कुरासङ्गसंयुक्तायै नमः
८७५ ,, कुक्कुरानन्तविग्रहायै नमः
८७६ ,, कूर्चारम्भायै नमः
८७७ ,, कूर्चबीजायै नमः
८७८ ,, कूर्चजापपरायणायै नमः
८७९ ,, कुलिन्यै नमः
८८० ,, कुलस्थानायै नमः
८८१ ,, कूर्चकण्ठपरागत्यै नमः
८८२ ,, कूर्चवीणाभालदेशायै नमः
८८३ ,, कूर्चमस्तकभूषितायै नमः
८८४ ,, कुलवृक्षगतायै नमः
८८५ ,, कूर्मायै नमः
८८६ ,, कूर्माचलनिवासिन्यै नमः
८८७ ,, कुलविन्द्वै नमः
८८८ ,, कुलशिवायै नमः
८८९ ,, कुलशक्तिपरायणायै नमः
८९० ,, कुलबिन्दुमणिप्रख्यायै नमः
८९१ ,, कुङ्कुमद्रुमवासिन्यै नमः
८९२ ,, कुचमर्दनसन्तुष्टायै नमः
८९३ ,, कुचजापपरायणायै नमः
८९४ ,, कुचस्पर्शनसन्तुष्टायै नमः
८९५ ,, कुचालिङ्गनहर्षदायै नमः
८९६ ,, कुगतिघ्न्यै नमः
८९७ ,, कुबेरार्चायै नमः
८९८ ,, कुचभुवे नमः
८९९ ,, कुलनायिकायै नमः
९०० ,, कुगायनायै नमः
९०१ ,, कुचधरायै नमः
९०२ ॐ कुमात्रे नमः
९०३ ,, कुन्ददन्त्यै नमः
९०४ ,, कुगेयायै नमः
९०५ ,, कुहराभाषायै नमः
९०६ ,, कुगेयाकुघ्नदारिकायै नमः
९०७ ,, कीर्त्यै नमः
९०८ ,, किरातिन्यै नमः
९०९ ,, क्लिन्नायै नमः
९१० ,, किन्नरायै नमः
९११ ,, किन्नर्यै नमः
९१२ ,, क्रियायै नमः
९१३ ,, क्रौङ्कारायै नमः
९१४ ,, क्रौंजपासक्तायै नमः
९१५ ,, क्रींहूंस्त्रींमन्त्ररूपिण्यै नमः
९१६ ,, किर्मीरितदृशापाङ्ग्यै नमः
९१७ ,, किशोर्यै नमः
९१८ ,, किरीटिन्यै नमः
९१९ ,, कीटभाषायै नमः
९२० ,, कीटयोन्यै नमः
९२१ ,, कीटमात्रे नमः
९२२ ,, कीटदायै नमः
९२३ ,, किंशुकायै नमः
९२४ ,, कीरभाषायै नमः
९२५ ,, क्रियासारायै नमः
९२६ ,, क्रियावत्यै नमः
९२७ ,, कींकींशब्दपरायै नमः
९२८ ,, क्लींक्लींक्लूंक्लैंक्लौंमन्त्र-रूपिण्यै नमः

९२९ ॐ कांकींकूंकैंस्वरूपायै नमः
९३० ॐ कःफट्मन्त्रस्वरूपिन्यै नमः
९३१ ॐ केतकीभूषणानन्दायै नमः
९३२ ॐ केतकीभरणान्वितायै नमः
९३३ ॐ कंकदायै नमः
९३४ ॐ केशिन्यै नमः
९३५ ॐ केशीसूदनतत्परायै नमः
९३६ ॐ केशरूपायै नमः
९३७ ॐ केशमुक्तायै नमः
९३८ ॐ कैकेय्यै नमः
९३९ ॐ कौशिक्यै नमः
९४० ॐ करवायै नमः
९४१ ॐ करवाह्लादायै नमः
९४२ ॐ केशरायै नमः
९४३ ॐ केतुरूपिण्यै नमः
९४४ ॐ केशवाराध्यहृदयायै नमः
९४५ ॐ केशवासक्तमानसायै नमः
९४६ ॐ क्लैव्यविनाशिन्यै नमः
९४७ ॐ क्लैं च क्लैंबीजजप-
तोषितायै नमः
९४८ ॐ कौशल्यायै नमः
९४९ ॐ कोशलाक्ष्यै नमः
९५० ॐ कोशायै नमः
९५१ ॐ कोमलायै नमः
९५२ ॐ कोलापुरनिवासायै नमः
९५३ ॐ कोलासुरविनाशिन्यै नमः
९५४ ॐ कोटिरूपायै नमः
९५५ ॐ कोटिरतायै नमः
९५६ ॐ क्रोधिन्यै नमः
९५७ ॐ क्रोधरूपिण्यै नमः
९५८ ॐ केकायै नमः
९५९ ॐ कोकिलायै नमः
९६० ॐ कोटयै नमः
९६१ ॐ कोटिमंत्रपरायणायै नमः
९६२ ॐ कोटयनन्तमंत्रयुतायै नमः
९६३ ॐ कैरूपायै नमः
९६४ ॐ केरलाश्रयायै नमः
९६५ ॐ केरलाचारनिपुणायै नमः
९६६ ॐ केरलेन्द्रगृहस्थितायै नमः
९६७ ॐ केदाराश्रमसंस्थायै नमः
९६८ ॐ केदारेश्वरपूजितायै नमः
९६९ ॐ क्रोधरूपायै नमः
९७० ॐ क्रोधपदायै नमः
९७१ ॐ क्रोधमात्रे नमः
९७२ ॐ कौशिक्यै नमः
९७३ ॐ कोदण्डधारिण्यै नमः
९७४ ॐ क्रौञ्चायै नमः
९७५ ॐ कौशल्यायै नमः
९७६ ॐ कौलमार्गगायै नमः
९७७ ॐ कौलिन्यै नमः
९७८ ॐ कौलिकाराध्यायै नमः
९७९ ॐ कौलिकागारवासिन्यै नमः
९८० ॐ कौतुक्यै नमः
९८१ ॐ कौमुद्यै नमः
९८२ ॐ कौलायै नमः
९८३ ॐ कौमार्यै नमः

९८४ ॐ कौरवार्चितायै नमः
९८५ ॐ कौण्डिन्यायै नमः
९८६ ॐ कौशिक्यै नमः
९८७ ॐ क्रोधज्वालाभासुररूपिण्यै नमः
९८८ ॐ कोटिकालानलज्वालायै नमः
९८९ ॐ कोटिमार्तण्डविग्रहायैनमः
९९० ॐ कृत्तिकायै नमः
९९१ ॐ कृष्णवर्णायै नमः
९९२ ॐ कृष्णायै नमः
९९३ ॐ कृत्यायै नमः
९९४ ॐ क्रियातुरायै नमः
९९५ ॐ कृशाङ्ग्यै नमः
९९६ ॐ कृतकृत्यायै नमः
९९७ ॐ क्रःफट्स्वाहास्वरूपिण्यै नमः
९९८ ॐ क्रौंक्रौंहूंफट्मन्त्रवर्णायै नमः
९९९ ॐ क्रींह्रींह्रूंफट्नमःस्वधायै नमः
१००० ॐक्रक्रींक्रीं-ह्रींह्रीं तथा ह्रूं ह्रूं फट्स्वाहामन्त्ररूपिण्यै नमः

इति काली-रहस्ये सर्वसाम्राज्यमेधा-चतुर्थन्त-
कालीसहस्रनामावली समाप्ता ।

काली-स्तवः

नमामि कृष्णरूपिणीं कृशाङ्गयष्टिधारिणीम् ।
समग्रतत्त्व-सागरामपारपार-गह्वराम् ॥ १ ॥
शिवां प्रभासमुज्ज्वलां स्फुरच्छशाङ्कशेखराम् ।
ललाटरत्नभास्वरां जगत्प्रदीप्ति-भास्कराम् ॥ २ ॥
महेन्द्रकश्यपार्चितां सनत्कुमार-संस्तुताम् ।
सुराऽसुरेन्द्र-वन्दितां यदार्थनिर्मलाद्भुताम् ॥ ३ ॥
अतर्क्यरोचिरूर्जितां विकारदोषवर्जिताम् ।
मुमुक्षुभिर्विचिन्तितां विकारदोषवर्जिताम् ॥ ४ ॥

जिनका रूप काला और शरीर कृश है, जो समस्त तत्त्वों की सागर हैं एवं जिनका पार पाना असम्भव तथा गहन है ऐसी काली को मैं नमस्कार करता हूँ ॥ १ ॥

भक्तों का कल्याण करने वाली, प्रकाश से उज्ज्वल, जिन महाकाली के ललाट में चन्द्रमा स्फुरित हो रहा है, ललाट में स्थित रत्नों की ज्योति से जो जगमगा रही हैं एवं अपने दिव्य-प्रकाश से सूर्य के समान शोभित हो रही हैं, ऐसी भगवती काली को मैं नमस्कार करता हूँ ॥ २ ॥

महेन्द्र एवं कश्यप से अर्चित, सनत्कुमार से संस्तुत, देवताओं और राक्षसों से वन्दित, सत्य, स्वच्छ तथा अद्भुत रूप वाली काली को मैं नमस्कार करता हूँ ॥ ३ ॥

मन, कर्म, वाणी से अतर्क्य तेज वाली, अत्यन्त पराक्रमशील, (कामादि) विकार एवं (रागादि) दोषरहित, मुमुक्षुओं से ध्यान की जाने वाली तथा विशेषतत्त्व से जानने योग्य भगवती श्री काली को मैं नमस्कार करता हूँ ॥ ४ ॥

मृतास्थिनिर्मितस्रजां मृगेन्द्रवाहनाग्रजाम् ।
सुशुद्धतत्त्वतोषणां त्रिवेदसारभूषणाम् ॥ ५ ॥
भुजङ्गहारहारिणीं कपालषण्डधारिणीम् ।
सुधार्मिकोपकारिणीं सुरेन्द्रवैरिघातिनीम् ॥ ६ ॥
कुठारपाशचापिनीं कृतान्तकाममेदिनीम् ।
शुभां कपालमालिनीं सुवर्णकल्पशाखिनीम् ॥ ७ ॥
श्मशानभूमिवासिनीं द्विजेन्द्रमौलिभाविनीम् ।
तमोऽन्धकारयामिनीं शिवस्वभावकामिनीम् ॥ ८ ॥

मुर्दे के अस्थि की माला धारण करने वाली, सिंह पर सवारी करने वाली. सर्वप्रथम उत्पन्न होने वाली, परब्रह्म को सन्तुष्ट करने वाली एवं तीनों वेदों के साररूपी भूषण को धारण की हुई भगवती श्री महाकाली को मैं नमस्कार करता हूँ ॥ ५ ॥

सर्पों की माला एवं कपाल-समूहों को धारण करने वाली, परम धार्मिकोपकारिणी एवं इन्द्र के शत्रुओं का विनाश करने वाली महाकाली को मैं नमस्कार करता हूँ ॥ ६ ॥

कुठार, पाश एवं धनुष धारण करने वाली, काल के मनोरथ को व्यर्थ करने वाली, सबका कल्याण करने वाली, कपालमाला धारण करने वाली तथा सुवर्ण प्रदान करने हेतु कल्पवृक्षस्वरूपा महाकाली को मैं नमस्कार करता हूँ ॥ ७ ॥

श्मशान भूमि में निवास करने वाली, चन्द्रमा को मस्तक में धारण करने वाली, तम-मोह रूप पञ्चपर्वा अविद्या की रात्रि स्वरूपा, जो महाकाली स्वभाव से शिव की कामना करने वाली हैं, उन महाकाली को मैं नमस्कार करता हूँ ॥ ८ ॥

सहस्रसूर्यराजिकां धनञ्जयोपकारिकाम् ।
सुशुद्धकालकन्दलां सुभृङ्गवृन्दमञ्जुलाम् ॥ ९ ॥
प्रजायिनीं प्रजावतीं नमामि मातरं सतीम् ।
स्वकर्मकारणे गतिं हरप्रियां च पार्वतीम् ॥१०॥
अनन्तशक्ति-कान्तिदां यशोऽर्थभुक्तिमुक्तिदाम् ।
पुनः पुनर्जगद्धितां नमाम्यहं सुरार्चिताम् ॥११॥
जयेश्वरि ! त्रिलोचने ! प्रसीद देवि ! पाहि माम् ।
जयन्ति ते स्तुवन्ति ये शुभं लभन्त्यभीक्ष्णशः ॥१२॥

सहस्रों सूर्य के समान शोभित होने वाली, रण में अर्जुन को विजय प्रदान कर उनका उपकार करने वाली, विशुद्ध कालतत्त्व की अंकुर स्वरूपा, भृङ्गमाला के समान अत्यन्त मनोहर स्वरूपा महाकाली को मैं नमस्कार करता हूँ ॥ ९ ॥

संसार को उत्पन्न करने वाली, संसार रूपी सन्तान वाली, मनुष्यों को स्व-कर्मानुसार फल प्रदात्री, शिव-प्रिया सती पार्वती को मैं नमस्कार करता हूँ ॥ १० ॥

अनन्तशक्ति, अनन्त कान्ति, यश, अर्थ, भोग तथा मोक्ष प्रदान करने वाली, बारम्बार जगत् का कल्याण करने वाली तथा देवगणों से सदा अर्चित भगवती श्री महाकाली को मैं नमस्कार करता हूँ ॥११॥

हे ईश्वरि ! तुम्हारी जय हो, हे त्रिलोचने ! मेरे ऊपर प्रसन्न हो जाओ और मेरी रक्षा करो। हे मातः ! जो तुम्हारी स्तुति करते हैं, वे सर्वदा विजय प्राप्त करते हैं एवं निरन्तर कल्याण के भागी होते हैं ॥ १२ ॥

सदैव ते हतद्विषः परं भवन्ति सज्जुषः ।
ज्वरापहे शिवेऽधुना प्रशाधि मां करोमि किम् ॥१३॥
अतीव मोहितात्मनो वृथा विचेष्टितस्य मे ।
तथा भवन्तु तावका यथैव चोषितालकाः ॥१४॥
इमां स्तुतिं मयेरितां पठन्ति कालिसाधकाः ।
न ते पुनः सुदुस्तरे पतन्ति मोहगह्वरे ॥१५॥

इति काली-रहस्ये श्रीब्रह्मकृतः कालीस्तवः समाप्तः ।

उनके शत्रुगण विनष्ट हो जाते हैं तथा श्रेष्ठ जनों से वे सदैव सेवित होते हैं । हे तीनों तापों को हरण करने वाली भगवती ! मुझे आज्ञा प्रदान करो, मैं क्या करूँ ? ॥ १३ ॥

हे मातः ! मेरी आत्मा अत्यधिक मोह में पड़ी हुई है, मेरी सारी चेष्टाएं व्यर्थ हो रही हैं । अब तुम मेरे ऊपर प्रसन्न होओ, जिससे मैं मुक्ति का पात्र बन जाऊँ ॥ १४ ॥

फलश्रुति—श्री ब्रह्मदेव कहते हैं कि, मेरे द्वारा निर्मित इस स्तुति को जो काली-साधक पढ़ते हैं । वे अत्यन्त दुस्तर मोहगर्त्त में नहीं पड़ते ॥ १५ ॥

इस प्रकार 'शिवदत्ती' हिन्दी व्याख्यासहित काली-रहस्य में
श्री ब्रह्मदेवकृत कालीस्तव समाप्त ।

कालिकाष्टकम्

ध्यानम्

गलद् - रक्तमुण्डावली - कण्ठमाला
महाघोररावा सुदंष्ट्रा कराला ।
विवस्त्रा श्मशानालया मुक्तकेशी
महाकाल-कामाकुला-कालिकेयम् ॥ १ ॥
भुजे वामयुग्मे शिरोऽसी दधाना
वरं दक्षयुग्मेऽभयं वै तथैव ।
सुमध्याऽपि तुङ्गस्तनाभारनम्रा
लसद्रक्तसृक्कद्वया सुस्मितास्या ॥ २ ॥

जिनके कण्ठ में रहने वाली मुण्डमाला से निरन्तर रक्तस्राव हो रहा है, जो महाघोर शब्द करने वाली और बड़े-बड़े दाँतों से अत्यन्त भीषण हैं, नङ्गी, श्मशान में निवास करने वाली, बिखरे बालों वाली एवं महाकाल से रति के लिए सर्वदा व्यग्र रहती हैं, वही कालिका के नाम से विख्यात हैं ॥ १ ॥

जो अपनी बायीं ओर की दो भुजाओं में मुण्ड एवं खड्ग और दाहिनी भुजाओं में वर एवं अभय मुद्रा धारण की हैं, जिनका कटितट अत्यन्त मनोहर एवं समुन्नत स्तनों के भार से कुछ आगे की ओर झुका हुआ है, जिनके मुख के दोनों प्रान्त में रक्त सुशोभित हो रहा है, जो मन्द-मन्द हास कर रही हैं यह वही महाकालिका हैं ॥ २ ॥

शवद्वन्द्वकर्णावतंसा सुकेशी
लसत्प्रेतपाणि-प्रयुक्तैक-काञ्ची ।
शवाकार-मञ्चाधिरूढा शिवाभि-
श्चतुर्दिक्षु शब्दायमानाऽभिरेजे ॥ ३ ॥

विरञ्च्यादिदेवास्त्रयस्ते गुणांस्त्रीन्
समाराध्य कालि ! प्रधाना बभूवुः ।
अनादि सुरादि मखादि भवादि
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ४ ॥

जगन्मोहनीयं तु वाग्वादिनीयं
सुहृत्पोषिणीं शत्रुसंहारणीयम् ।
वचः स्तम्भनीयं किमुच्चाटनीयं
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ५ ॥

जिनके दोनों कानों में दो मुर्दों के कर्णफूल लटक रहे हैं, केश अत्यन्त मनोहर हैं, जो मुर्दों के हाथों की काञ्ची (करधनी) वाली एवं शवाकार मञ्च पर बैठी हुई हैं और चारों ओर शृगालिनों के फेत्कार से सुशोभित हो रही हैं, यह वही विश्व-विख्यात महाकालिका हैं ॥३॥

हे मातः ! ब्रह्मा, शिव एवं विष्णु ये तीन देव तुम्हारे प्रत्येक तीन गुणों में से एक-एक की उपासना (सत्त्व के विष्णु, रज के ब्रह्मदेव तथा तम के शिव) से महान् हो गये हैं । हे मातः ! तुम्हारे अनादि, सुरादि, मखादि तथा सृष्टि के आदि स्वरूप को देवता भी प्राप्त करने में असमर्थ हैं ॥ ४ ॥

हे मातः ! तुम जगत् को मोहित करने वाली महाकाली हो अथवा सरस्वती हो ? क्या तुम भक्तों का पालन करने वाली हो या शत्रुओं का संहार करने वाली हो ? अथवा वाणी को स्तम्भित करने वाली या पुरुषों का उच्चाटन करने वाली, इनमें तुम कौन हो ? क्योंकि, तुम्हारे स्वरूप को देवता भी प्राप्त करने में असमर्थ हैं ॥५॥

इयं स्वर्गदात्री पुनः कल्पवल्ली
मनोजांस्तु कामान् यथार्थं प्रकुर्यात् ।
कथा ते कृतार्था भवन्तीति नित्यं
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ६ ॥

सुरापानमत्ते ! सुभक्तानुरक्ते !
लसत्पूतचित्ते ! सदाविर्भवस्ते ।
जप- ध्यान-पूजा - सुधाधौतपङ्काः
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ७ ॥

चिदानन्दकन्दं हसन्मन्दमन्दं
शरच्चन्द्रकोटि-प्रभापुञ्ज-बिम्बम् ।

हे मातः ! यह तुम्हारी कथा (स्तुति) स्वर्ग देने वाली एवं कल्प-वृक्ष की लता है, अतः यह उपासक-भक्तों के समस्त कामनाओं को पूर्ण करे। वे उपासक तुम्हारी स्तुति से जगत् में सदैव कृतार्थ रहते हैं। क्योंकि तुम्हारे स्वरूप को प्राप्त करने में देवगण भी असमर्थ हैं ॥६॥

हे सुरापान में प्रमत्त रहने वाली, भक्तों पर अनुकम्पा करने वाली मातः ! पवित्र चित्त में तुम्हारा आविर्भाव होता रहता है। क्योंकि जप, ध्यान और पूजारूपी सुधा से चित्त की मलीनता को दूर करने वाले देवगण भी तुम्हारे स्वरूप को प्राप्त करने में असमर्थ हैं ॥ ७ ॥

हे मातः ! चिदानन्द का कन्द, मन्द-मन्द हास्युक्त करोड़ों शरत्कालीन चन्द्रमा के चन्द्रिका-समूह का बिम्ब तथा

मुनीनां कवीनां हृदि द्योतमानं
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ८ ॥

महामेघकाली सुरक्ताऽपि शुभ्रा
कदाचिद् विचित्राकृतिर्योगमाया ।
न बाला न वृद्धा न कामातुराऽपि
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥ ९ ॥

क्षमस्वापराधं महागुप्तभावं
मया लोकमध्ये प्रकाशीकृतं यत् ।
तव ध्यानपूतेन चापल्यभावात्
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥१०॥

मुनियों एवं कवियों के हृदय में प्रकाशित होने वाले तुम्हारे स्वरूप को देवता भी नहीं जानते ॥ ८ ॥

हे मातः ! कभी तुम महामेघ के समान महाकाली, कभी सुन्दर रक्त वर्ण वाली महालक्ष्मी और कभी शुभ्रस्वरूपा सरस्वती एवं कदाचित् विचित्र आकृतियुक्त योगमाया बन जाती हो । वस्तुतः न तो तुम बाला हो, न वृद्धा हो, न कामातुरा (युवती) ही हो, तुम्हारे यथार्थ रूप को देवता भी नहीं प्राप्त कर सकते ॥ ९ ॥

हे मातः ! मैंने तुम्हारे ध्यान में निमग्न होकर चपलतावश इस संसार में तुम्हारे जिस गुप्त स्वरूप को प्रकट किया है, मेरे उस अपराध को क्षमा करो । क्योंकि तुम्हारे स्वरूप को प्राप्त करने में देवता भी असमर्थ हैं ॥ १० ॥

फलश्रुतिः

यदि ध्यानयुक्तः पठेद् यो मनुष्य-
स्तदा सर्वलोके विशालो भवेच्च ।
गृहे चाऽष्टसिद्धिर्मृते चापि मुक्तिः
स्वरूपं त्वदीयं न विन्दन्ति देवाः ॥११॥

इति काली-रहस्ये श्रीमच्छङ्कराचार्यविरचितं
कालिकाष्टकं सम्पूर्णम् ।

फलश्रुति—**मनुष्य यदि महाकाली का ध्यान कर इस स्तोत्र का पाठ करे, तो वह सारे लोक में महान् हो जाता है। तथा उसके घर में आठों सिद्धियाँ निवास करती हैं एवं मरने पर उसकी मुक्ति हो जाती है, ऐसे तो तुम्हारे स्वरूप को देवगण भी नहीं जानते ॥ ११ ॥**

इस प्रकार 'शिवदत्ती' हिन्दी व्याख्यासहित काली-रहस्य में
श्रीमच्छङ्कराचार्य-विरचित कालिकाष्टक सम्पूर्ण ।

श्रीदक्षिणकाली-सपर्य्यापद्धतिः

प्रथमं पञ्चवर्णरजश्चित्रं शुद्धं स्थानं गत्वा, पूजावेद्या बहिः स्थित्वा, गुरुं प्रणम्य, इष्टदेवतां प्रणम्य, दिक्पालांश्च प्रणम्य, आचम्य, ततः कुशहस्तो मौनो पापशमनार्थं श्लोकद्वयं पठेत् । तद्यथा—

'ॐ देवि ! त्वत्प्रकृतं चित्तं पापाक्रान्तमभून्मम ।
तन्निस्सरन्तु चित्तान्मे पापं हूं फट् च ते नमः ॥ १ ॥
सूर्यः सोमो यमः कालो महाभूतानि पञ्च च ।
एते शुभाऽशुभस्येह कर्मणो नव - साक्षिणः ॥ २ ॥

श्री दक्षिणकाली की पूजा-पद्धति का विधान—

साधक सर्वप्रथम पाँच वर्ण के रंग से रंगे हुए अत्यन्त शुद्ध स्थान में बैठकर पूजा-वेदी के बाहर अपने गुरु, इष्टदेवता तथा दिक्पालों को प्रणाम कर पवित्री धारण करे। और आचमन एवं प्राणायाम करने के उपरान्त हाथ में कुशा लेकर मौन हो पाप-शान्ति के लिए 'ॐ देवि' से 'नव-साक्षिणः' पर्यन्त दो श्लोकों द्वारा महाकाली की प्रार्थना करे।

श्लोकार्थ—हे मातः ! तुम्हारे द्वारा निर्मित यह मेरा चित्त पापाक्रान्त हो गया है। वह पाप तुम्हारी कृपा से अब हमारे चित्त से दूर हो जावे 'हूँ फट्' तुम्हें नमस्कार है ॥ १ ॥

सूर्य, सोम, यम, काल एवं पञ्च महाभूत हमारे द्वारा किये गये कर्म के साक्षी हैं ॥ २ ॥

इति पठित्वा, सम्प्रार्थ्य, गृहे प्रविशेत् । मौनी मूलेनाऽऽचम्य, 'ॐ वज्रोदके हूं फट् स्वाहा' इति जलं गृहीत्वा, 'हूं स्वाहा' इति करे आदाय, ॐ ह्रीं विशुद्धसर्वपापानि शमया-शेषविकल्पमपनय हूं फट् स्वाहा' इत्यनेन पादौ प्रक्षाल्य, 'ॐ ह्रीं स्वाहा' इति पुनराचम्य, 'ऐं कालिकायै नमः, ऐं कपालिन्यै नमः, ऐं कुल्लायै नमः' इति त्रिराचम्य, ततो मूलेन हस्तौ प्रक्षाल्य, 'ॐ कालिकायै नमः, ॐ कपालिन्यै नमः' इति दशहस्ताङ्गुलीभिरोष्ठौ द्विरुन्मृज्य, 'ॐ कुल्लायै नमः' इति करं प्रक्षाल्य, मूलेन सङ्कुचिताङ्गुलीभिर्मुखम्, तर्जन्यङ्ष्ठाभ्यां नासिके, मूलेन अनामिकाङ्गुष्ठाभ्यां कर्णौ,

प्रार्थना के पश्चात् साधक मण्डप-गृह में प्रवेश करे। मौन होकर मूलमन्त्र से आचमन करे फिर 'ॐ वज्रोदके हूं फट् स्वाहा' यह मन्त्र पढ़ कर पूजा पात्र में जल ले, पुनः 'हूं स्वाहा' पढ़ कर उस जल को हाथ में लेवे। और 'ॐ ह्रीं' से 'फट् स्वाहा' पर्यन्त मन्त्र को पढ़ अपना पैर प्रक्षालित करे। तदनन्तर 'ॐ ह्रीं स्वाहा' पढ़ कर पुनः आचमन कर, 'ऐं कालिकायै नमः' से लेकर 'ऐं कुल्लायै नमः' पर्यन्त तीन मन्त्र पढ़कर तीन बार आचमन करे। पुनः मूल मन्त्र से हाथ धो कर 'ॐ कालिकायै नमः' 'ॐ कपालिन्यै नमः' पढ़ कर अपने दोनों हाथों की दशों अंगुलियों को संकुचित कर ओष्ठ को दो बार जल से शुद्ध करे फिर 'ॐ कुल्लायै नमः' पढ़ कर हाथ का प्रक्षालन करे। तत्पश्चात् सर्वत्र मूल मन्त्र पढ़ते हुए मुखादि का स्पर्श करे। जिसकी विधि इस प्रकार है—दशों अंगुलियों को संकुचित कर मुख का, तर्जनी-अंगुष्ठा अँगुलियों से नासिका का, अनामिका-अंगुष्ठा अंगुलियों से दोनों कानों का, अंगुष्ठा-कनिष्ठा से नाभि का, दोनों

अङ्गुष्ठ-कनिष्ठाभ्यां नाभिं, तलेन हृदयं, सर्वाङ्गुलीभिर्मस्तकं भुजौ च स्पृशेत्।

ततस्तिलकं कुलचन्दनादिना ललाटोदर-हृत्कण्ठ-दक्ष-पार्श्वांऽस-पृष्ठ-ककुदि भुजद्वन्द्वे मूर्द्धनि द्वादशस्वपि स्थानेषु कुर्यात्। ततः—

'देव्यस्त्रं विलिखेद्भाले कालीबीजं ततो हृदि।
शक्तिं मध्यगतां कृत्वा कूर्चबीजं न्यसेत् सुधीः॥'

ततः सामान्यार्घ्यस्थापनं कुर्यात्। तद्यथा—स्ववामे त्रिकोणवृत्त-भूपुरात्मकं मण्डलं विलिख्य, ततः 'ॐ आधार-शक्तिभ्यो नमः' इति पुष्पाऽक्षतादिभिरभ्यर्च्य, 'ॐ हः द्वारार्घ्यं

हाथ के तलवे से हृदय का, एवं सभी अंगुलियों से मस्तक तथा भुजाओं का स्पर्श करे।

फिर कुल (रक्त) चन्दन से ललाट, उदर, हृदय, कण्ठ, दाहिने पार्श्व, दोनों कन्धे, पृष्ठ, ककुद् (शिखा), दोनों भुजाओं एवं शिर आदि बारह स्थानों पर तिलक करे।

तदनन्तर साधक मस्तक पर त्रिशूल का चिह्न, हृदय पर काली बीज (क्रीं) तथा दोनों के बीच (कण्ठप्रदेश) में शक्ति बीज लिख कर कूर्च बीज से न्यास करे।

तथा सामान्य रूप से अर्घ्य पात्र स्थापित करे। उसकी विधि इस प्रकार है—अपने बाएँ त्रिकोण, वृत्त एवं भूपुरात्मक मण्डल बना कर 'ॐ आधारशक्तिभ्यो नमः' इस मन्त्र को पढ़ कर पुष्पाक्षतादि से उस त्रिकोण का अर्चन करे। फिर 'ॐ हः द्वारार्घ्यं साधयामि' ऐसा कह

साधयामि' इत्युक्त्वा, 'फट्' इति प्रक्षालितं शङ्खादिपात्रं त्रिपादिकोपरि निधाय, 'नमः' इति जलेनाऽऽपूर्य,

'गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥'

इति मन्त्रेणाऽङ्कुशमुद्रया सूर्यमण्डलात्तीर्थं तज्जले आवाह्य, गन्धादिकं प्रणवेन निःक्षिप्य, धेनु-मत्स्यमुद्रं दर्शयित्वा, प्रणवेनाऽष्टादशकृत्वो वाऽभिमन्त्र्य, फडिति मन्त्रेण द्वारमभिषेचयेत् । 'ॐ मणिधारिणि वज्रिणि शिखरिणि सर्वलोकवशङ्करि हूँ फट् स्वाहा' इति शिखां बध्नीयात् । ततो द्वारदेवताः पूजयेत् । 'गं गणेशाय नमः, बं बटुकाय नमः, क्षं क्षेत्रेशाय नमः, यं योगिनीभ्यो नमः' इति ऊर्ध्वे, वामे, वक्षे, अध इति चतुर्दिक्षु पूजयेत् 'गं गङ्गायै नमः, यं यमुनायै

कर 'फट्' इस मन्त्र से प्रक्षालित शङ्खादि अर्घ्य पात्र को त्रिपादिका के ऊपर रख कर 'नमः' पढ़ कर शङ्खपात्र को जल से पूर्ण करे। फिर 'गङ्गे च॰' इत्यादि मन्त्र को पढ़ते हुए अंकुश मुद्रा दिखा कर सूर्य-मण्डल से उस जल में तीर्थों का आवाहन करे। और प्रणव के मन्त्र से उसमें गन्धादि छोड़ें। पुनः धेनु एवं मत्स्य मुद्रा प्रदर्शित कर अठारह बार प्रणव को पढ़ कर उस जल को अभिमन्त्रित करे। तथा 'फट्' इस मन्त्र को पढ़ कर अर्घ्य के जल से द्वार को अभिषिक्त करे। फिर 'ॐ मणिधरिणि॰' मन्त्र को पढ़ते हुए शिखाबन्धन करे। तदनन्तर द्वारदेवता का पूजन करे। फिर 'गं गणेशाय नमः' से 'यं योगिनीभ्यो नमः' पर्यन्त चार मन्त्रों को पढ़ कर मण्डप-द्वार के ऊपर, बायें, दाहिने, नीचे तथा चारों दिशाओं में पूजन

नमः' इति शाखापार्श्वयोः, 'लं लक्ष्म्यै नमः, सं सरस्वत्यै नमः' इति ऊर्ध्वे, अधश्च पूजयेत् । 'ॐ ब्रह्माण्याद्यष्टमातृभ्यो नमः' इति देहल्याम् गन्ध-पुष्पादिनाऽभ्यर्च्य, ततो दक्षिणाङ्गं सङ्कोचयन् दक्षचरणमग्रे निधाय, वामशाखामस्पृशन् मण्डलाभ्यन्तरे गत्वा, 'ॐ रक्ष रक्ष हूं फट् स्वाहा' इति जलेनाऽभिषिच्य, 'ॐ पवित्रवज्रभूमे हूं फट् स्वाहा' इत्यभिमन्त्र्य, 'ह्रीं आधारशक्तिकमलासनाय नमः' इत्यासनमभ्यर्च्य त्रिकोणं विलिख्य, 'आसुरेखे-वज्ररेखे हूं फट् स्वाहा' इति, मण्डलं विलिख्य, तत्र, 'हसौः' इति प्रेतबीजं विलिख्य, 'ह्रीं आधारशक्तिकमलासनाय नमः' इत्यासनमभ्यर्च्य । 'ॐ अनन्ताय नमः, विमलासनाय नमः, पद्मासनाय

फिर 'गङ्गायै नमः' से 'सरस्वत्यै नमः' पर्यन्त पढ़ कर ऊपर तथा नीचे तत्तद्देवताओं का पूजन करे। पुनः 'ब्रह्माण्याद्यष्टमातृभ्यो नमः' पढ कर मण्डप-प्रवेश द्वार की देहली का गन्ध-पुष्पादि से अर्चन करे। फिर अपने दाहिने अंग को संकुचित करते हुए दाहिना पैर आगे रख कर मण्डप की बायीं ओर रहने वाले किसी शाखा का बिना स्पर्श किये मंडप के भीतर प्रवेश करे। 'ॐ रक्ष रक्ष०' इत्यादि मन्त्र को पढ़ कर आसन पर जल छिड़के। 'ॐ पवित्र-वज्रभूमे' आदि मन्त्र से आसन को अभिमन्त्रित कर 'ह्रीं आधार-शक्ति०' मन्त्र को पढ़ कर आसन की पूजा करे एवं त्रिकोण लिख कर 'आसुरेखे०' आदि मन्त्र पढ़कर त्रिकोण के चारों ओर मंडल बनावे। मंढल पर 'हसौं' इस प्रेत बीज को लिखकर 'ह्रीं आधारशक्ति०' आदि मन्त्र को पढ़ कर आसन स्थान की पूजा कर 'ॐ अनन्ताय नमः' से 'पद्मासनाय नमः' पर्यन्त मन्त्र पढ़ कर

नमः' इति कुशानास्तीर्य, व्याघ्राजिनकृष्णसारमृगाजिनं कम्बलासनं वा प्रकल्पयेत । तदभावे तु पञ्चविंशतिकुशनिर्मित-विष्टरं शवरूपं वा प्रकल्पयेत् । 'ह्लः सौं महाप्रेतपद्मासनाय नमः' इत्यभ्यचर्य, तत्रासने आत्ममन्त्रेण उपविश्य, वामोरूपरि दक्षिणपादं कृत्वा, बद्धवीरासनः वामपादोपरि दक्षिणोरुं धृत्वा, विपरीतं वा पूर्वाभिमुख उत्तराभिमुखो वा आसनं धृत्वा मन्त्रं पठेत् ।

आसनमन्त्रस्य मेरुपृष्ठऋषिः सुतलं छन्दः, कूर्मोदेवता आसनपरिग्रहे विनियोगः ।

'ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥' इति ।

उस आसन-स्थान पर कुशा बिछावे, तत्पश्चात् बाघाम्बर, कृष्ण मृगचर्म, सामान्य मृगचर्म अथवा कम्बल का आसन उस मंडल पर स्थापित करें। यदि इस प्रकार के आसन का अभाव हो, तो पचीस कुशे से बने हुए विष्टर को शवरूप में स्थापित करे। पुनः 'ह्लः सौं महाप्रेतपद्मासनाय नमः' इस मन्त्र से पुनः आसन की पूजा करे। आत्ममन्त्र (पृथ्वि त्वया०) से उस पर बांये घुटने पर दाहिना पैर रख कर वीरासन से अथवा बाँयें पैर पर दाहिना घुटना रख कर विपरीत क्रम से आसन पर पूर्वाभिमुख या उत्तराभिमुख हो, आसन पर बैठे। आसन पर बैठते समय, 'आसनमन्त्रस्य' से लेकर 'विनियोगः' पर्यन्त मन्त्र पढ़ कर उसके नीचे जल छोड़े। फिर 'ॐ पृथ्वि०' से 'पवित्रं कुरु चासनम्' मन्त्र पढ़ कर आसन पर बैठे। तदनन्तर 'वास्तुपुरुषाय नमः' 'ब्रह्मणे नमः' मन्त्र पढ़ कर नैऋत्य कोण के देवताओं की पूजा कर 'धर्माय नमः' से

'ॐ वास्तुपुरुषाय नमः, ॐ ब्रह्मणे नमः' इति नैर्ऋत्ये सम्पूज्य, 'ॐ धर्माय नमः, ॐ ज्ञानाय नमः, ॐ वैराग्याय नमः, 'ॐ ऐश्वर्याय नमः' इति दिक्षु सम्पूज्य, 'ॐ अधर्माय नमः, ॐ अवैराग्याय नमः, ॐ अनैश्वर्याय नमः' इति विदिक्षु सम्पूजयेत्। 'ॐ हूँ फट् स्वाहा' इति मन्त्रेण 'ॐ ह्रीं स्वाहा' इति मन्त्रेण वा काय-वाक्-चित्तशोधनं कृत्वा, 'रक्ष रक्ष हूँ फट् स्वाहा' इत्यात्मानमभिरक्षयेत्।

'ॐ शताभिषेके शताभिषेके पदे हूँ फट स्वाहा, ॐ पुष्पकेतुराजार्हत् पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे। पुष्पचयावकीर्णे हूँ फट् स्वाहा' इति पुष्पमभिमन्त्रयेत्। अन्यानि-पूजावस्तूनि सर्वाणि सामान्यार्घ्योदकेनाऽभिषिच्य, धेनुमुद्रा-मत्स्यमुद्रे दर्शयित्वा, पुष्पाणि शुद्धानि विभावयेत्। 'वमि'ति

लेकर 'ऐश्वार्याय नमः पर्यन्त मन्त्र पढ़ते हुए, चारों दिशाओं में तत्तद्देवताओं का पूजन करे। पुनः 'ॐ हूँ फट् स्वाहा' अथवा 'ॐ ह्रीं स्वाहा' मन्त्र पढ़ कर अपने शरीर, वाणी तथा चित्त का शोधन करे। 'रक्ष रक्ष हूँ फट् स्वाहा' पढ़ कर अपनी रक्षा करे।

तदनन्तर 'ॐ शताभिषेके' से 'हूँ फट् स्वाहा' पर्यन्त प्रथम मन्त्र तथा 'ॐ पुष्पकेतु' से 'हूँ फट् स्वाहा' पर्यन्त दो मन्त्रों को पढ़कर भगवती की पूजा के लिए लाये गये पुष्पों को अभिमन्त्रित करे। पुनः अन्य पूजा की वस्तुओं को पूर्व स्थापित अर्घ्य जल से सिञ्चित कर धेनु तथा मत्स्य मुद्रा प्रदर्शित कर 'पुष्प सर्वथा शुद्ध है' ऐसी कल्पना करे। फिर अपने चारों ओर 'वम्' इस मन्त्र को पढ़कर जलधारा

जलधारां प्रक्षिप्य, वह्निबीजेन वह्निप्राकारं विचिन्त्य, 'हूँ फट्' इति मन्त्रेण चतुर्दिक्षु क्रोधदृष्टया निरीक्ष्य, सर्वान् विघ्नानुत्सारयेत् ।

तद्यथा—'सर्वविघ्नानुत्सारय हूँ फट् स्वाहा' इति मन्त्रेण ऊर्ध्वमवलोक्य, दिव्यांश्चतुर्दिक्षु जलक्षेपेणाऽन्तरिक्षगान् वाम-पार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य, लाज-चन्दन-सिद्धार्थ-तिल-दधि-दूर्वाक्षतानामन्यतममादाय,

'ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये चाऽत्र विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥'

इति पठंश्चतुर्दिक्षु क्षिपेत् । ततो वामे, 'ॐ गुरुभ्यो नमः, ॐ परमगुरुभ्यो नमः, ॐ परात्परगुरुभ्यो नमः, ॐ परमेष्ठि-

---

प्रक्षिप्त करे, और 'रं' इस वह्निबीज को पढ़कर 'मेरे चारों ओर रक्षा के लिए अग्नि का प्राकार बन गया है' इस प्रकार की कल्पना कर 'हूँ फट् स्वाहा' मन्त्र पढ़ कर चारों ओर क्रोध दृष्टि से देखते हुए सभी विघ्नों को दूर करे । वह इस प्रकार है—

'सर्वविघ्नानुत्सारय हूँ फट् स्वाहा' इस मन्त्र से ऊपर की ओर देखते हुए चारों ओर जल छिड़क कर अन्तरिक्ष में चारों ओर रहने वाले तथा तीन बार बाँयें पैर के आघात से पृथ्वी स्थित समस्त विघ्नों को दूर कर लावा, रक्त चन्दन, सफेद सरसों, तिल, दही, दूर्वा एवं अक्षतादि में-से कोई एक लेकर 'ॐ अपसर्पन्तु' से नश्यन्तु शिवाज्ञया' पर्यन्त मन्त्र को पढ़कर चारों ओर उस श्वेत सर्षप को छोड़े । इस प्रकार समस्त विघ्नों को दूर कर अपनी बाँयीं ओर 'ॐ गुरुभ्यो नमः' से लेकर 'ॐ परमेष्ठिगुरुभ्यो नमः, पर्यन्त चार मन्त्रों को

गुरुभ्यो नमः' दक्षिणे 'ॐ गणेशाय नमः' पुरतः, 'ॐ दक्षिण-कालिकायै नमः' इति प्रणमेत् ।

ततः करशुद्धि कुर्यात् । तद्यथा-'हूँ' इति मन्त्रेण चन्द-नाक्तानि कुसुमान्यङ्गुल्यग्रेणादाय, 'हौं' इति मन्त्रेण कराभ्यां मर्दयित्वा, 'क्लीं' इति बीजेन दक्षहस्तेन सम्मृज्य, 'ॐ तत्सत्' इति मन्त्रेण वामहस्तेनाघ्राय, 'हौं' इति मन्त्रेण ऐशान्यां दिशि पुष्पं परित्यजेत् ।

'ॐ ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः ।
मृत्यु-रोग-भय-क्रोधाः पतन्तु रिपुमस्तके ॥'

इति मन्त्रेण वा परित्यजेत् । परित्यागश्च नाराचमुद्रया ।

पढ़कर तत्तद् गुरुओं को प्रणाम करे। इसी प्रकार दाहिनी ओर 'ॐ गणेशाय नमः' मन्त्र पढ़ गणेश को तथा 'ॐ दक्षिणकालिकायै नमः' मन्त्र पढ़कर अपने आगे काली को प्रणाम करे।

पुनः कर-शुद्धि करे। उसकी विधि इस प्रकार है 'हूँ' इस मंत्र से चन्दन-मिश्रित पुष्प को दाहिने हाथ की अङ्गुलि के अग्रभाग से लेकर 'हौं' इस मन्त्र से दोनों हाथों से उसे मल कर 'क्लीं' इस बीज मन्त्र से अपने दाहिने हाथ से पीस कर 'ॐ तत्सत्' इस मंत्र से बाँयें हाथ में लेकर उस पुष्प को सूंघ, और 'हौं' इस मन्त्र को पढ़कर ईशान कोण में उस पुष्प का परित्याग करे। अथवा 'ॐ ते सर्वे॰' से लेकर 'रिपुमस्तके' पर्यन्त मंत्र पढ़कर नाराच (बाण) मुद्रा से पुष्प का परित्याग करे।

श्लोकार्थ--जो मुझे मारने के लिए हिंसक जन्तु आने वाले हैं, वे सभी एवं मृत्यु, रोग, भय तथा क्रोध शत्रु के शिर पर सवार हों।

दक्षिण काली-पूजा के प्रथम साधक को उपर्युक्त विधान करना आवश्यक है। तत्पश्चात् उसे भूतशुद्धि करनी चाहिए।

भूतशुद्धिः

शिरसि भैरवाय ऋषये नमः। मुखे उष्णिक्छन्दसे नमः। हृदये ॐ दक्षिणकालिकायै नमः। गुह्ये क्रीं बीजाय नमः। पादयोः हूँ शक्तये नमः। सर्वाङ्गे क्रीं कीलकाय नमः।

षडङ्गन्यासः

'क्रां हृदयाय नमः' अङ्गुलीभिस्तर्जनीमध्यमानामभिः प्रसारिताभिर्हृदयं स्पृशेत्। 'क्रीं शिरसे स्वाहा' इति तर्जनी-मध्यमाभ्यां शिरसि स्पृशेत्। 'क्रूं शिखायै वषट्' इति बद्ध-मुष्टिना अङ्गुष्ठेन शिखां स्पृशेत्। 'क्रैं कवचाय हुम्' इति मन्त्रेण व्यस्तहस्ताभ्यां सर्वाङ्गं।

'क्रौं नेत्रत्रयाय वौषट्' इति तर्जन्या अनामया नेत्रे, मध्यमया भ्रूमध्यमेवं नेत्रत्रयं स्पृशेत्। 'क्रः अस्त्राय फट्' इति छोटिकया दिग्बन्धनं कुर्यात्।

भूतशुद्धि भूतशुद्धि के विषय में मन्त्र पूर्वक सिर आदि अङ्गों के स्पर्श करने का निर्देश है। अतः साधक को 'शिरसि भैरवाय ऋषये नमः' से क्रीं कीलकाय नमः' पर्यन्त पढ़कर शिर से लेकर सभी अङ्गों का स्पर्श करना चाहिए।

षडङ्गन्यास—'क्रां हृदयाय नमः' पढ़कर दोनों हाथ की तर्जनी-मध्यमा एवं अनामिका अँगुलियों को खुला पसार कर हृदय का, 'क्री शिरसे स्वाहा' मन्त्र पढ़कर तर्जनी एवं मध्यमा अँगुलियों से शिर का स्पर्श करे। इसी प्रकार 'क्रूं शिखायै वषट्' पढ़कर मुट्ठी बांधकर केवल अँगूठे से शिखा का, क्रौं कवचाय हुम्' मन्त्र पढ़कर दोनों हाथ को उलट कर उसके तलवे से सर्वाङ्ग का स्पर्श करे। 'क्रौं नेत्रत्रयाय वौषट्' पढ़कर तर्जनी, अनामिका से दोनों नेत्रों का तथा मात्र मध्यमा से भ्रूमध्य का स्पर्श करे। 'क्रः अस्त्राय फट्' इस मंत्र को पढ़ चुटकी बजाकर दिग्बन्धन करे।

एवं करन्यासः—'क्रां अङ्गुष्ठाभ्यां नमः, क्रीं तर्जनीभ्यां स्वाहा, क्रूं मध्यमाभ्यां वषट्, क्रैं अनामिकाभ्यां हुम्, क्रौं कनिष्ठाभ्यां वौषट्, क्रः करतलकरपृष्ठाभ्यां फट्' एवं करन्यासं विधाय, दशधा सप्तधा पञ्चधा वा मूलेन व्यापकन्यासं कुर्यात्। ततः पूर्वोक्तक्रमेण प्राणायामत्रयं विदध्यात्। तद्यथा-दक्षिणहस्ताङ्गुष्ठेन दक्षनासापुटं निरुध्य, वामनासापुटेन मूलं षोडशवारं जपन्, शनैः शनैः प्राणाख्यवायुमाकृष्य, शिरसि सहस्रारे धारयेदिति पूरकः। दक्षहस्ताऽनामिकातर्जन्यङ्गुष्ठैः नासापुटद्वयं निरुध्य, मूलं चतुःषष्टिवारं जपन् कुम्भयेत्। पुनर्दक्षनासापुटमङ्गुष्ठनिरोधनं त्यक्त्वा, मूलं द्वात्रिंशद्वारं जपञ्छनैः शनैस्तद्वायुं रेचयेत्। इति प्राणायामत्रयम्।

इसी प्रकार 'क्रां अङ्गुष्ठाभ्यां नमः' से 'क्रः करतलकरपृष्ठाभ्यां फट्' पर्यन्त मन्त्रों को पढ़कर करन्यास करे। तत्पश्चात् दश, सात अथवा पाँच वार मूल मन्त्र पढ़ कर व्यापक न्यास करे। पुनः पूर्वोक्त विधि से तीन प्राणायाम करे। उसकी विधि इस प्रकार है – अपने दाहिने हाथ के अँगूठे से दाहिनी नासिका को बन्द कर बाँयीं ओर की नासिका से सोलह बार मूल को जपते हुए प्राण वायु को खींचे, फिर उस वायु को सहस्रार में स्थापित करे, यह तो पूरक हुआ। फिर दाहिने हाथ की अनामिका एवं तर्जनी तथा अँगूठे से दोनों नासिका को रोक कर मूल मन्त्र का चौंसठ बार जप करे, यह कुम्भक की विधि हुई। पुनः दाहिने हाथ के अँगूठे को, जिससे दाहिनी नासिका बन्द की थी, उसे वहाँ से हटा दे और बत्तीस बार मूल मन्त्र का जप करते हुए धीरे-धीरे वायु को निकाले, यह रेचक की विधि हुई। इस प्रकार एक प्राणायाम पूर्ण होता है। इसी प्रकार तीन प्राणायाम करे।

यदि संविच्छोधनमिच्छेत्तदाऽत्रैव कर्तव्यम् । तद्विधिस्तु-
'ॐ सिद्धाढ्यां शिवगेहिनीं करलसत्पाशाङ्कुशां भैरवीं
भक्ताभीष्टवरप्रदां सुकुशलां संसारबन्धच्छिदाम् ।
पीयूषाम्बुधिमन्थनोद्भवरसां संविद्विलासां परां
वीराराधितपादुकां सुविजयां ध्यायेज्जगन्मोहिनीम् ।।'
इति ध्यात्वा ।

'ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे ।
भैरवानन्दतृप्त्यर्थं पवित्रा भव सर्वदा ।।'
ॐ ब्राह्मण्यै नमः स्वाहा ।
'ॐ सिद्धमूलक्रिये देवि हीनबोधप्रबोधिनि ।।
राजप्रजावशङ्करि शत्रुकण्ठनिषूदिनि ।।'
'ॐ ऐं क्षत्रियायै नमः स्वाहा ।
'ॐ अज्ञानेन्धनदीप्ताग्निज्वालाग्निज्ञानरूपिणि ।।
आनन्दस्याशमप्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ।।'
ॐ ह्रीं वैश्यायै नमः स्वाहा ।

यदि संवित् (बुद्धि) शोधन करना हो, तो इसी समय उसकी भी शुद्धि कर लेनी चाहिए। वह इस प्रजार है—'ॐ सिद्धाढ्यां' से 'जगन्मोहिनीं' पर्यन्त मन्त्र पढ़ कर ध्यान करे। पुनः 'ॐ संविदे ब्रह्मसम्भूते' तथा 'ॐ ब्राह्मण्यै नमः स्वाहा' पढ़ कर ब्राह्मणी का शोधन करे। इसी प्रकार 'ॐ सिद्धमूलक्रिये' से 'निषूदिनि' तथा 'ॐ ऐं क्षत्रियायै नमः स्वाहा' पर्यन्त मन्त्र पढ़ कर क्षत्रिया का, 'ॐ अज्ञानेन्धन' से 'ॐ ह्रीं वैश्यायै नमः स्वाहा' पढ़ कर वैश्या का,

'ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि ।
त्रैलोक्य-विजये मातः समाधिफलदा भव ॥'

'ॐ क्लीं शूद्रायै नमः स्वाहा ।' इत्येतैर्मन्त्रैः संशोध्य, ततः 'ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय आकर्षय सिद्धि देहि सर्वं मे वशमानय स्वाहा' इति मन्त्रेणाऽभिमन्त्रयेत् ।

ततः—'ॐ ह्रीं ह्रीं लूं अः अं डं एं महाघोरेशाय नमः' इत्यघोरमन्त्रेण चाऽभिमन्त्र्य, मूलमन्त्रं सप्तवारं जप्त्वा, श्रीष्टदेवीमावाह्य, धेनुमुद्रां योनिमुद्रां च प्रदर्श्य, छोटिकाभिर्दिग्बन्धनं तालत्रयं च कृत्वा, तत्र श्रीष्टदेवीं मानसोपचारैः सम्पूज्य, 'ऐं गुरुपादुकाभ्यो नमः' इति मन्त्रेण ब्रह्मरन्ध्रे श्रीगुरुं त्रिधा तर्पयेत् । मूलेन हृत्कमले श्रीष्टदेवतां पञ्चधा तर्पयेत् । ततः स्वीकारः । 'ऐं आत्मतत्त्वेन आत्मतत्त्वं

'ॐ नमस्यामि' से 'ॐ क्लीं शूद्रायै नमः स्वाहा' पर्यन्त मन्त्र पढ़ कर शूद्रा संवित् का शोधन करे। तदनन्तर 'ॐ अमृते' से 'वशमानय स्वाहा' पर्यन्त मन्त्र पढ़ कर संवित् (ज्ञान) शक्ति को अभिमन्त्रित करे। पुनः 'ॐ ह्रीं ह्रीं' इस अघोर मन्त्र को पढ़ कर अभिमन्त्रित करे। फिर मूल मन्त्र को सात बार जप कर, इष्ट देवी भगवती कालिका का आवाहन कर, धेनुमुद्रा तथा योनिमुद्रा प्रदर्शित कर चुटकी बजाते हुए दिग्बन्धन कर, दोनों हाथों से तीन बार थपोड़ी बजाकर श्री इष्ट देवी का मानसोपचार से पूजन कर, 'ऐं गुरुपादुकाभ्यो नमः' इस मन्त्र को तीन बार पढ़ कर ब्रह्मरन्ध्र में श्री गुरु का तीन बार एवं पाँच बार मूल मन्त्र को पढ़ कर हृत्कमल में श्री इष्ट देवता का पाँच बार तर्पण करे। फिर आत्म-समर्पण करे । पुनः 'ऐं आत्मतत्त्वेन आत्मतत्त्वं शोधयामि स्वाहा' से

शोधयामि स्वाहा, ऐं विद्यातत्त्वेन विद्यातत्त्वं शोधयामि स्वाहा, ऐं शिवतत्त्वेन शिवतत्त्वं शोधयामि स्वाहा' मूलमुच्चार्य्य, 'सर्वतत्त्वेन सर्वतत्त्वं शोधयामि स्वाहा' 'ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरा भव सर्वसत्त्ववशङ्करि स्वाहा' इति मुखेन जाठराग्नौ जुहुयात् । मूलमन्त्रेण सर्वं पिबेत् । ततः स्तुवीत–

'संविद्देवि गरीयसी गुणमयी वैगुण्यविध्वंसिनी
मायामोहमदान्धकारशमनी तापत्रयोन्मूलिनी ।
वाग्देवी वदनाम्बुजैकरसिका सम्बोधिनीदीपका
ब्रह्मज्ञानविवेकसिद्धविजयी विज्ञानमूर्त्यै नमः ॥१॥
संविदासवयोर्मध्ये संविदेव गरीयसी ।
भयत्राशाय निर्गन्धा विख्याता मोदकारिणी ॥२॥

इति स्तुत्वा, श्रीगुरुं श्रीष्टदेवतां च प्रणम्य, ऋष्यादिन्यासं षडङ्गन्यासं करन्यासं च कुर्यात् ।

'शिवतत्त्वं शोधयामि स्वाहा' पर्यन्त मन्त्र पढ़ कर मूल मन्त्र का उच्चारण करते हुए 'सर्वतत्त्वेन सर्वतत्त्वं शोधयामि स्वाहा' तथा 'ऐं वद वद' से 'सर्वसत्त्ववशं करि स्वाहा' इन दो मन्त्रों की जाठराग्नि में आहुति दे तथा मूल मन्त्र से सब पी जाने की भावना करे। फिर 'संविद्देवि' से लेकर 'मोदकारिणी' पर्यन्त दो श्लोकों से स्तुति कर श्री गुरु तथा श्री इष्ट देवता को प्रणाम कर ऋष्यादिन्यास, षडङ्गन्यास एवं करन्यास करे । उसकी विधि इस प्रकार है—

तद्यथा—शिरसि भैरवाय ऋषये नमः, मुखे उष्णिक्-छन्दसे नमः, हृदये ॐ दक्षिणकालिकायै नमः, गुह्ये क्रीं बीजाय नमः, पादयोः ह्रूं शक्तये नमः, सर्वाङ्गे क्रीं कीलकाय नमः।

षडङ्गन्यासः—क्रां हृदयाय नमः, क्रीं शिरसे स्वाहा, क्रूं शिखायै वषट्, क्रैं कवचाय हुम्, क्रौं नेत्रत्रयाय वौषट्, क्रः अस्त्राय फट्। एवं करन्यासः—क्रां अङ्गुष्ठाभ्यां नमः, क्रीं तर्जनीभ्यां स्वाहा, क्रूं मध्यमाभ्यां वषट्, क्रैं अनामिकाभ्यां हुम्, क्रौं कनिष्ठाभ्यां वौषट्, क्रः, करतलकरपृष्ठाभ्यां फट्।

एवं करन्यासं विधाय, भूतशुद्धि कुर्यात्। अङ्के करावुत्तानीकृत्य निश्चलचित्तः 'सोऽहम्' इति मन्त्रेण प्रबोधितां कुण्डलिनीं मूलाधारात् सुषुम्नावर्त्मना स्वाधिष्ठाने मणिपूरेऽनाहते

'ॐ शिरसि भैरवाय ऋषये नमः' से लेकर 'क्रीं कीलकाय नमः' तक मन्त्रों को पढ़ते हुए शिर, मुख, हृदय, गुह्यस्थान, दोनों पैर तथा सर्वाङ्ग का स्पर्श कर ऋष्यादि न्यास करे।

षडङ्गन्यास—'क्रां हृदयाय नमः' से 'क्रः अस्त्राय फट्' पर्यन्त मन्त्रों को पढ़ कर हृदय, शिर, शिखा, दोनों बाहु, नेत्र तथा भ्रूमध्य का स्पर्श कर चारों ओर चुटकी बजावे। इसी प्रकार 'क्रां अङ्गुष्ठाभ्यां नमः' से लेकर 'क्रः करतलकरपृष्ठाभ्यां फट्' पर्यन्त मन्त्रों को पढ़ते हुए दोनों हाथ के अँगूठे आदि पाँचों अँगुलियों का स्पर्श करते हुए दोनों हाथ के करतल तथा करपृष्ठ का स्पर्श करे।

साधक इस प्रकार करन्यास कर भूतशुद्धि करे जो इस प्रकार है—हृदय प्रदेश पर हाथों के वृत्त के समान गोला स्थापित करे। पश्चात् स्थिर मन हो 'सोऽहम्' इस मन्त्र से जाग्रत कुण्डलिनी को मूलाधार से उठा कर सुषुम्ना मार्ग से स्वाधिष्ठान, मणिपुर तथा

क्रमेणानीय, तत्र स्थितं जीवं प्रदीपकलिकाकारं विचिन्त्य, तन्मुखे निक्षिप्य, ततो विशुद्धाख्याज्ञाचक्रे आनीय, ततः शिरोऽवस्थिताधोमुखसहस्रारचक्रे हिमनिभसर्ववर्णविभूषिता क-खादित्रिरेखासु आलक्षत्रयविभूषितसहस्रदलयुक्तं पद्मम्। तत्र गुरुं तस्मिन् समानीय तत्कर्णिकास्थपरशिवे 'हंसः' इति मन्त्रेण संयोजयेत्।

अथ पादतो जानुपर्यन्तं चतुष्कोणं सुवर्णाभं 'लम्' इति बीजेन युक्तं सवज्रं कंपृथ्वीमण्डलं तत्र गमनसहितं पादेन्द्रियं गन्धसहितं घ्राणेन्द्रियं निवृत्तिकलायुक्तं ब्रह्माणं, समानवायुं च विभावयेत् ॥१॥ ततो जानुतो नाभिपर्यन्तमर्द्धचन्द्राकारं

अनाहत क्रम से ऊपर ले जाकर अनाहत चक्र पर स्थित हुए जीव को दीपक की लौ के समान ध्यान कर कुण्डलिनी को उस जीव के मुख में डाल कर पुनः उसे विशुद्ध चक्र तथा आज्ञाचक्र में ले जाकर शिरःप्रदेश में रहने वाले अधोमुख सहस्रारचक्र में हिम के समान सर्व वर्ण विभूषित अकार, ककार तथा खकार के समान तीन रेखा वाले आकार, लकार, क्षकार वर्ण से युक्त सहस्रदल पर्यन्त विभूषित पद्म स्थित है वहीं पर गुरु का ध्यान एवं आवाहन कर उन्हें कर्णिका पर स्थित शिव में 'हंसः' इस मन्त्र को पढ़कर दोनों को एक में मिला दे।

इसके बाद पैर से लेकर जानुपर्यन्त इष्ट देवता के शरीर में चतुष्कोण सुवर्ण के समान देदीप्यमान 'लम्' इस बीज मन्त्र से युक्त पादेन्द्रिय तथा गन्धसहित घ्राणेन्द्रिय की मोक्ष कलायुक्त ब्रह्मदेव तथा समान वायु का ध्यान करे॥ १॥ फिर जानु से नाभि

श्वेताभं 'वम्' इति बीजेन युक्तं पद्मद्वयलाञ्छितं जलमण्डलं तत्र च ग्रहणक्रियासहितं पाणीन्द्रियं रसेन सह जिह्वेन्द्रियं प्रतिष्ठाकलासहितं श्रीविष्णुमुदानवायुं च विभावयेत् ॥२॥ ततो नाभितो हृदयपर्यन्तं त्रिकोणं रक्तं 'रम्' इति बीजेन युक्तं स्वस्तिकान्वितं तेजोमण्डलं तत्र च विसर्गक्रियासहितं पाय्विन्द्रियरूपेण चक्षुरिन्द्रियं विद्याकलासहितं शिवं व्यान-वायुं च विभावयेत् ॥३॥

ततो हृदयाद् भ्रूमध्य-पर्यन्तं वर्तुलं धूम्रवर्णं 'यम्' इति बीजेन युक्तं षड्बिन्दुलाञ्छितं वायुमण्डलं तत्रानन्दक्रिया-सहितोपस्थेन्द्रियं स्पर्शसहितं त्वगिन्द्रियं शान्तिकलासहितमी-शानमपानवायुं च विभावयेत् ॥४॥

पर्यन्त शरीर में अर्द्धचन्द्राकार श्वेत वर्ण वाले 'वम्' इस बीज मन्त्र से युक्त दो पद्मों से युक्त जलमण्डल की कल्पना कर वहाँ पर ग्रहण क्रियायुक्त पाणि इन्द्रिय की तथा रसयुक्त जिह्वेन्द्रिय की प्रतिष्ठा कर, अकल महाविष्णु तथा उदान वायु का ध्यान करे। फिर नाभि से हृदय पर्यन्त शिर में त्रिकोण आकृति के रक्त वर्ण वाले, 'रम्' इस बीज मन्त्र से युक्त स्वस्तिकाकार तेजोमण्डल पर विसर्ग क्रिया युक्त पायु इन्द्रिय एवं चक्षुइन्द्रिय की तथा विद्या कलायुक्त शिव की एवं व्यान वायु का ध्यान करे ॥ ३ ॥

पुनः हृदय से लेकर भ्रू पर्यन्त इष्ट देवता के शरीर में गोलाकार धूम्र वर्ण के 'यम्' बीज से युक्त छह विन्दुओं के चिह्न वाले वायु-मण्डल पर आनन्द क्रिया सहित उपस्थेन्द्रिय तथा स्पर्श गुण युक्त त्वगिन्द्रिय, शान्तिकलायुक्त ईशान देवता तथा अपान वायु का ध्यान करे ॥ ४ ॥

ततो भ्रूमध्याद् ब्रह्मरन्ध्रपर्यन्तं वर्त्तुलं स्वच्छं 'हम्' इति बीजेन युक्तं नभोमण्डलं तत्र वचनक्रियासहितं वागिन्द्रियं शब्दसहित श्रोत्रेन्द्रियं, शान्त्यतीताख्यकलासहितं सदाशिवं प्राणवायुं च ध्यायेत् ॥५॥ ततः सहस्रारे शून्ये सर्वचैतन्यमये परब्रह्म ध्यायेत् ।

ततः सपरिकरं पृथ्वीमण्डलं जलमण्डले, तच्च वह्निमण्डले, तच्च वायुमण्डले, तच्चाकाशमण्डले, तच्चाहङ्कारे, तन्महत्तत्वे, तच्च प्रकृतौ, तां च ब्रह्मणि लीनां विभावयेत् । ततः सर्वं शून्यं विचिन्तयेत् ।

पुनः भ्रूमध्य से ब्रह्मरन्ध्रपर्यन्त शरीर में गोलाकार स्वच्छ वर्ण वाले 'हम्' इस बीज मन्त्र से युक्त नभोमण्डल पर वचन क्रिया सहित वाग् इन्द्रिय की तथा शब्द सहित श्रोत्रेन्द्रिय की शान्ति से परे किसी सूक्ष्म कला के सहित सदाशिव एवं प्राणवायु का ध्यान करे ॥ ५ ॥ तदनन्तर सहस्रार चक्र में शून्य सर्व चैतन्यमय में परब्रह्म का ध्यान करे।

तदनन्तर समस्त परिकर युक्त पृथ्वीमण्डल को जल में पुनः सपरिकर जलमण्डल को वह्निमण्डल में, फिर उसे वायुमण्डल में, पश्चात् उसे आकाशमण्डल में, आकाशमण्डल को अहङ्कार में, अहङ्कार को महत्तत्त्व में, महत्तत्त्व को प्रकृति में तथा उस प्रकृति को पृथ्वी में लीन हुआ ध्यान करे। उस समय कुछ नहीं है सर्वशून्य है ऐसा ध्यान करे।

ततो दक्षिणकुक्षौ कृष्णवर्णमङ्गुष्ठप्रमाणं ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजं सुरापानहृदयं गुरुतल्पकटीयुतं तत्संसर्गपदद्वन्द्वमुपपातकरोमकं चर्मधरमधोमुखं पापपुरुषं विचिन्त्य, तत्सहितं शरीरं पूरकविधिना दशकृत्वो जप्तेन 'यम्' इति बीजेन नभो ध्यातेन संशोष्य, कुम्भकविधिना चतुःषष्टिकृत्वो जप्तेन 'रम्' इति बीजेन वह्निमण्डले मेढ्रमूले वा ध्यातेन, रक्तवर्णां मायां नाभौ ध्यात्वा, तदुद्भूताऽग्निना सन्दह्य, रेचकविधिना द्वात्रिंशत् कृत्वो जप्तेन 'यम्' इति बीजेन पापपुरुषोद्भूवं भस्म कालीबीजं हृदि पीताभं ध्यात्वा, तदुद्भूतेन वायुना प्रोत्सारयेत् ।

फिर दाहिनी कुक्षि में, काले वर्ण के अङ्गुष्ठ मात्र के लम्बे, पाप पुरुष, जिसका ब्रह्महत्या शिर है, सुवर्णस्तेय जिसकी भुजा है, सुरापान जिसका हृदय है, गुरुतल्पगमन, जिसकी कटि है, उनसे संसर्ग (खान-पान शयन) करने वाला जिसके दो पैर हैं; विविध उपपातक, जिसके रोम एवं चमड़े हैं, ऐसे अधोमुख पाप पुरुष का ध्यान कर उस पाप पुरुष के शरीर को पूर्व में कहे गये विधिपूर्वक क्रम के अनुसार दश बार मूल मन्त्र का जप कर 'यम्' इस वायु के बीज मन्त्र का आकाश में ध्यान कर उस पाप पुरुष का शरीर सुखा कर कुम्भक की रीति से चौंसठ बार मूल मन्त्र से युक्त 'रम्' इस बीज मन्त्र से जप कर वह्निमण्डल का मेढ्र (अण्डकोश) मूल में ध्यान कर तथा रक्त वर्ण की माया का नाभि स्थान में ध्यान कर उससे उद्भूत अग्नि के द्वारा उस शुष्क पाप पुरुष के शरीर को जलाकर भस्म करे। पुनः रेचक क्रम से बत्तीस बार मूल मन्त्र के सहित 'यम्' इस बीज मन्त्र का जप कर पाप पुरुष के उस भस्म को पीत वर्ण के हृदय में काली बीज द्वारा हृदय में ध्यान कर वायु से पाप पुरुष के भस्म को दूर करे।

ततः पूरकविधिना षोडशकृत्वो जप्तेन 'वम्' इति वरुण-बीजेन हृदिस्थेन घण्टिकायां ध्यातेन वा तद्भस्म ललाटे तुषाराभं कूर्चबीजं ध्यात्वा, तदुद्भूतेनाऽमृतेनाऽऽप्लाव्य, कुम्भक-विधिना चतुःषष्टिजप्तेन 'लम्' इति बीजेन पृथ्वीमण्डले ध्यातेन तद्भस्म घनीकृत्य, रेचकविधिना द्वात्रिंशत्कृत्वो जप्तेन 'हम्' इति बीजेन नभोमण्डले स्थितेनाऽङ्गानि रेचयित्वा, पापपुण्यनिर्मुक्तं शरीरं शाम्भवं ध्यात्वा, चिन्मयाद्भूतानि उत्पादयेत् । तद्यथा—

'सोऽहं' 'हंसः' इति वा मन्त्रेण प्रकृतिं चिन्मयादुत्पाद्य, प्रकृतेर्महत्तत्त्वं महदादहङ्कारमहङ्काराग्नभो, नभसो वायु,

---

पुनः पूरक विधि के अनुसार सोलह बार मूल मन्त्र का जप कर हृदय स्थान में रहने वाले 'वम्' इस वरुण के बीज मन्त्र का कण्ठ में ध्यान कर उस भस्म को ललाट में रख कर तुषार वर्ण वाले कूर्च बीज (हुम्) का ध्यान कर उससे उत्पन्न हुए अमृत के द्वारा उसको भिगो कर कुम्भक क्रम के अनुसार मूल मन्त्र का चौंसठ बार ध्यान कर 'लम्' इस पृथ्वी मण्डल के बीज का ध्यान कर उस भस्म को गाढ़ा बनावे । पुनः रेचक क्रम के अनुसार बत्तीस बार मूल मन्त्र का जप कर 'हम्' इस नभोमण्डल में स्थित बीज मन्त्र से अपने शरीर को सर्वथा अलग कर पाप-पुण्य से सर्वथा रहित एक पृथक् शिव स्वरूप का ध्यान करे। और उस शरीर को सर्वथा एक अद्भुत तथा ज्ञानमय उत्पन्न हुआ समझे। वह इस प्रकार है—

'सोहं' 'हंसः' इस मन्त्र से चिन्मय से प्रकृतितत्त्व को अलग करे। फिर प्रकृति से महत्तत्त्व, महत्तत्त्व से अहङ्कार, अहङ्कार से आकाश,

वायोरग्नि,वह्नेरपस्ततः पृथ्वीमुत्पादयेत्। तेनैव मन्त्रेण कुण्डलिनीं चैतन्यमयीं चन्द्रमण्डलान्तर्गतामृतं पाययित्वा षट्सु चक्रेषु क्रमशः स्वचरणयुगलान्तर्गतामृतवृष्ट्या सिञ्चन्तीं तेष्वानीय, जीवं तया वियोज्य, हृदये संस्थाप्य, तां मूलाधारे स्वयम्भूलिङ्गे स्थापयेत्। इत्यात्मानं देवतामयं ध्यायेत्।

इति भूतशुद्धिः।

ततः प्राणमन्त्रेण जीवस्थापनं कुर्यात्। तत्र क्रमः–ॐ अस्य प्राणस्थापनमन्त्रस्य ब्रह्म-विष्णु-महेश्वरा ऋषयः, ऋग्यजुःसामानि छन्दांसि, चैतन्यरूपा प्राणशक्तिर्देवता प्राणस्थापने विनियोगः।

आकाश से वायु, वायु से अग्नि, अग्नि से जल, जल से पृथ्वी तत्त्व को उत्पन्न करे। फिर चैतन्यस्वरूपिणी कुण्डलिनी को चन्द्रमण्डल में स्थित अमृत का पान करा कर मूलाधारादि षड्चक्रों को क्रम से अपने दोनों चरण के अन्तर्गत रहने वाले अमृत-वृष्टि से सींचती हुई, उस पञ्चतत्त्व में लाकर स्थापित करे और उस चैतन्यमयी कुण्डलिनी से जीव को अलग कर हृदय में स्थापित कर जीवरहित कुण्डलिनी को मूलाधार के स्वयम्भू लिङ्ग में स्थापित करे। इस प्रकार अपने को देवतामय का ध्यान करे।

इस प्रकार भूतशुद्धि समाप्त।

तदनन्तर प्राण प्रतिष्ठा मन्त्र से हृदय स्थल पर जीव को स्थापित करे। उसकी विधि इस प्रकार है--

सर्व प्रथम 'ॐ अस्य॰' से लेकर 'विनियोगः' तक मन्त्र पढ़ कर पृथ्वी पर जल गिरावे।

शिरसि ब्रह्म-विष्णु-महेश्वरेभ्यः ऋषिभ्यो नमः, मुखे ऋग्यजुःसामभ्यश्छन्दोभ्यो नमः, हृदये प्राणशक्त्यै देवतायै नमः, गुह्ये आं बीजाय नमः, पादयोः ह्रींशक्तये नमः, सर्वाङ्गे क्रौं कीलकाय नमः, इति विन्यस्य षडङ्गानि विन्यसेत् ।

ङं कं खं गं घं आकाश-वायु-वह्नि-जल-पृथिव्यात्मने हृदयाय नमः । ञं चं छं जं झं शब्द-स्पर्श-रूप-रस-गन्धात्मने शिरसे स्वाहा । णं टं ठं डं ढं श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणात्मने शिखायै वषट् । नं तं थं दं धं वाक्-पाणि-पाद-पायूपस्थात्मने कवचाय हुम् । मं पं फं बं भं वक्तव्यादानगमनविसर्गानन्दात्मने नेत्रत्रयाय वौषट् । शं यं रं वं लं हं षं क्षं सं लं मनोबुद्ध्यहङ्कारचित्तात्मने अस्त्राय फट् ।

एवं करन्यासः, सोऽपि यथा-नाभेरारभ्य पादान्तम् आमिति न्यसेत्, ङं कं खं घं गं आकाश-वायु-वह्नि-जल-

---

'ब्रह्म-विष्णु-महेश्वरेभ्यः ऋषिभ्यो नमः' से शिर का, 'ऋग्यजुः-सामभ्यश्छन्दोभ्यो नमः' पढ़ कर मुख का। इसी प्रकार तत्तन्मन्त्रों को पढ़ते हुए हृदय, गुह्यस्थान, पैर तथा सर्वाङ्ग में 'क्रौं कीलकाय नमः' पर्यन्त मन्त्र पढ़ कर न्यास करे। तदनन्तर षडङ्गन्यास करे। 'ङं कं' से ले कर 'अस्त्राय फट्' पर्यन्त छह मन्त्र पढ़ कर क्रमशः हृदय, शिर, शिखा, दोनों हाथ, भ्रूमध्य तथा दोनों नेत्र का स्पर्श कर अन्तिम मन्त्र से शिर के चारों ओर हाथ घुमा कर ताली बजावे।

इसी प्रकार करन्यास भी करे, वह इस प्रकार है—नाभि से लेकर पैर पर्यन्त 'आम्' इस मन्त्र से न्यास करे। फिर 'ङं कं' से

पृथिव्यात्मने अंगुष्ठाभ्यां नमः, ञं चं छं झं जं शब्द-स्पर्श-रूप-रस-गन्धात्मने तर्जनीभ्यां स्वाहा, णं टं ठं ढं डं श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणात्मने मध्यमाभ्यां वौषट्, नं तं थं धं दं वाक्पाणि-पाद-पायूपस्थात्मने अनामिकाभ्यां हूम्, मं पं फं भं बं वक्तव्यादान-गमन-विसर्गानन्दात्मने कनिष्ठिकाभ्यां वौषट्, शं यं रं वं लं हं षं क्षं सं ळं मनो-बुद्ध्यहङ्कार-चित्तात्मने करतलकरपृष्ठाभ्यां फट् ।

ततो नाभितो हृदयपर्यन्तं ह्रीमिति, हृदयान् मस्तकान्तं क्रोमिति विन्यसेत् । यं त्वगात्मने नमः इति हृदि, रं असृगात्मने नम इति दक्षिणांसे, लं मांसात्मने नम इति ककुदि, वं मेद आत्मने नमः इति वामस्कन्धे, शं अस्थ्यात्मने नमः इति हृदयाद् दक्षिणभुजाग्रान्तम्, षं मज्जात्मने नमः इति हृदयाद् वामभुजाग्रान्तं, सं शुक्रात्मने नमः इति हृदयाद् दक्षिणपादाग्रान्तं, हौं ओज आत्मने नमः इति हृदयाद् वामपादाग्रान्तं,

---

'करतलकरपृष्ठाभ्यां फट्' पर्यन्त मन्त्र को पढ़कर अंगूठा, दोनों तर्जनी, दोनों मध्यमा, दोनों अनामिका, दोनों कनिष्ठिका तथा दोनों हाथ के करतल तथा करपृष्ठ का स्पर्श करे ।

इस प्रकार करन्यास करने के पश्चात् नाभि से हृदय पर्यन्त 'ह्रीं' इस मन्त्र से एवं हृदय से मस्तक पर्यन्त 'क्रौम्' इस मन्त्र से न्यास करे । फिर 'यं त्वगात्मने नमः' से 'संजीवात्मने नमः' पर्यन्त प्राणप्रतिष्ठा के दश मन्त्रों को पढ़ते हुए क्रमशः हृदय, दाहिना कन्धा, ककुद्, वामस्कन्ध, हृदय से दाहिनी भुजा पर्यन्त, हृदय से वामभुजा पर्यन्त, हृदय से दक्षिण पादाग्रभाग, हृदय से वामपादाग्र-

हं घ्राणात्मने नमः इति हृदयात् नाभ्यन्तं, संजीवात्मने नमः इति हृदयान्मस्तकान्तं प्राणमन्त्रेण सप्तधा पञ्चधा वा व्यापकन्यासं कुर्यात् ।

ततो ध्यायेत् । यथा—

रक्ताब्धिपोतारुणपद्मसंस्थां
पाशाङ्कुशेष्वासशराऽसिबाणान् ।
शूलं कपालं दधतीं कराब्जै
रक्तां त्रिनेत्रां प्रणमामि देवीम् ॥'

ततो वक्ष्यमाण-लेलिहानमुद्रया हृदयं स्पृशन् एकादशवारं प्राणमन्त्रं जपेत् । मन्त्रश्च-आं ह्रीं क्रों यं रं लं वं शं षं सं हों ओं क्षं सं हं सः ह्रीं ओं हं सः श्रीदक्षिणकालिकायाः (मम) प्राणा इह प्राणाः, आं ह्रीं क्रों यं रं लं वं शं षं सं हों ओं क्षं शं सं हं सः ह्रीं ओं हं सः श्रीदक्षिणकालिकाया जीव इह स्थितः, आं ह्रीं क्रीं यं रं लं वं शं षं सं हों ओं क्षं सं हं सः श्रीदक्षिणकालिकायाः सर्वेन्द्रियाणि इह स्थितानि, आं ह्रीं क्रों यं रं लं वं शं षं सं हों ओं क्षं सं हं सः ह्रीं ओं हं सः श्रीदक्षिणकालिकाया वाङ्मन-स्त्वक्-चक्षुः-श्रोत्र-घ्राण-प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा, ॐ क्षं सं हं सः ह्रीं ओं

भाग, हृदय से नाभि प्रदेश पर्यन्त और हृदय से मस्तक पर्यन्त प्रदेश का न्यास करे । इस प्राण प्रतिष्ठा मन्त्र को पाँच या सात बार पढ़कर व्यापक न्यास करे ।

पुनः 'रक्ताब्धि' से 'प्रणमामि देवीम्' पर्यन्त मन्त्र पढ़कर देवी का ध्यान करे । फिर आगे कहे जाने वाले लेलिहान मुद्रा से हृदय का स्पर्श करते हुए ग्यारह बार प्राणमन्त्रों का जप करे । प्राण-प्रतिष्ठा

ह्रीं क्रों श्रीदक्षिणकालिकायाः प्राणाः इह प्राणाः, आं ह्रीं क्रों श्रीदक्षिणकालिकाया जीव इह स्थितः, आं ह्रीं क्रों श्रीदक्षिणकालिकायाः सर्वेन्द्रियाणि, आं ह्रीं क्रों श्रीदक्षिणकालिकायाः वाङ्-मन-स्त्वक्-चक्षुः-श्रोत्र-घ्राण-प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

ततो देवतारूपमात्मानं ध्यात्वा, प्राणायाम-ऋष्यादिन्यासषडङ्गन्यास-करन्यासान् विधाय, मातृकान्यासमाचरेत् ।

मातृकान्यासः

तत्र, ॐ अस्य मातृकामन्त्रस्य ब्रह्माऋषिर्गायत्रीछन्दो, मातृकासरस्वतीदेवता, हलो बीजानि, स्वराः शक्तयस्तदुभयं कीलकम् अभीष्टसिद्धचर्थे न्यासे विनियोगः ।

प्राणायामो यथा—इडया अ इ उ ऋ लृ ए ऐ ओ औ एभिः स्वरैः पूरयेत् । कु-चु टु-तु पु इति वर्णपञ्चकेन कुम्भयेत् । यरलवशषसह-एभिरष्टभिर्वर्णैः रेचयेत् ।

के मन्त्र हैं–'आं ह्रीं' से लेकर 'इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा' पर्यन्त इन्हीं मन्त्रों को ग्यारह बार पढ़ कर प्राणप्रतिष्ठा करनी चाहिए । तब स्वयं अपने को देवता (महाकाली) रूप ध्यान कर प्राणायाम, ऋष्यादिन्यास, षडङ्गन्यास तथा करन्यास कर मातृका न्यास करे ।

मातृकान्यास—सर्व-प्रथम हाथ में जल लेकर 'ॐ अस्य' से 'न्यासे विनियोगः' पर्यन्त मन्त्र पढ़ कर पृथ्वी पर छोड़ दे । फिर प्राणायाम करे । प्राणायाम की विधि इस प्रकार है—ईडा नाडी से 'अ' से लेकर 'औ' पर्यन्त स्वर पढ़कर शरीर को वायु से पूर्ण करे । फिर 'कु-चु-टु-तु-पु' इन पाँच वर्णों को पढ़कर उस वायु को रोक कर कुम्भक करे । फिर 'य' से लेकर 'ह' पर्यन्त आठ वर्णों को पढ़ कर वायु को धीरे-धीरे अलग करे । तब ऋष्यादि न्यास करे ।

ऋष्यादिन्यासो यथा—शिरसि ब्रह्मणे ऋषये नमः, मुखे गायत्रीछन्दसे नमः, हृदि मातृकासरस्वत्यै नमः, लिङ्गे हल्भ्यो बीजेभ्यो नमः, पादयोः स्वरेभ्यः शक्तिभ्यो नमः सर्वाङ्गे तदुभयकीलकाय नमः।

षडङ्गन्यासो यथा—अंकंखंगंघंङं आं हृदयाय नमः इंचंछंजंझंञं ईं शिरसे स्वाहा, उंटंठंडंढंणं ऊं शिखायै वषट्, एं तंथंदंधंनं ऐं कवचाय हुम्, ओंपंफंबंभंमं औं नेत्रत्रयाय बौषट्, अंयंरंलंवंशंषंसंहंलंक्षं अः अस्त्राय फट्।

एवं करन्यासो यथा—अंकंखंगंघंङं आं अङ्गुष्ठाभ्यां नमः, इंचंछंजंझंञं ईं तर्जनीभ्यां स्वाहा, उंटंठंडंढंणंऊं मध्यमाभ्यां वषट्, एं तंथंदंधंनं ऐं अनामिकाभ्यां हुम्, ओंपंफंबंभंमंऔं कनिष्ठिकाभ्यां वौषट्, अंयंरंलंवंशंषंसंहंक्षंअः करतलकर-पृष्ठाभ्यां फट्।

'ब्रह्मणे ऋषये नमः' गायत्रीछन्दसे नमः,' मातृकासरस्वत्यै नमः, हल्भ्यो बीजेभ्यो नमः, स्वरेभ्यः शक्तिभ्यो नमः, उभयकीलकाय नमः' आदि छह मन्त्र पढ़ कर एक-एक मन्त्र के क्रम से शिर, मुख, हृदय, लिङ्ग, पाद तथा सर्वाङ्ग का स्पर्श करें। इस प्रकार ऋष्यादि न्यास करने के पश्चात् षडङ्गन्यास करे। उसकी विधि इस प्रकार है—

षडङ्गन्यास—'अं-कं' से लेकर 'अः अस्त्राय फट्' पर्यन्त छह मन्त्र पढ़ कर क्रम से हृदय, शिर, शिखा, भ्रूमध्य सहित दोनों नेत्र का स्पर्श कर शिर के चारों ओर दाहिना हाथ घुमा कर दोनों हाथों से ताली बजावे।

एवं तत्पार्श्वे आचमनीयपात्रं त्रिरावृत्तचतुरस्रे आधार-शक्तिं सम्पूज्य, पात्रं साधारं संस्थाप्य, 'नमः' इति मूलेन वा जलेन प्रपूर्य 'वषट्' इति पुष्पं, 'नमः' इति गन्धं च निःक्षिप्य, जाती-कर्पूर-कङ्कोल-लवङ्ग-तमालकादिचूर्णं निक्षिप्याऽस्त्रेणा-ऽष्टकृत्वोऽभिमन्त्र्य, मूलेनाऽभिमन्त्र्य, धेनु-योनिमुद्रे दर्शयेत् ।

पात्रस्थापन की विधि—अर्घ्यपात्र के बाँयीं ओर त्रिकोणवृत्त चतुरस्र पर आधारशक्ति की पूजा का आधार पर पाद्यपात्र स्थापित कर 'नमः' इससे अथवा मूल मन्त्र से उसको जल से पूर्ण कर उसमें 'वषट्' इस मन्त्र से पुष्प छोड़े। 'नमः'-पढ़ कर गन्ध छोड़े। और उसमें उशीर, रोचना (हरिद्रा), श्यामाक, विष्णुक्रान्ता कमल, दूर्वा डाल कर अस्त्र के मन्त्र से उसे आठ बार अभिमन्त्रित कर पुनः मूल मन्त्र से अभिमन्त्रित कर धेनु तथा योनि मुद्रा प्रदर्शित करना चाहिए।

'पद्यपात्र स्थापन के पश्चात् भगवती का उस पाद्यपात्र के सन्निकट आचमनीय-पात्र स्थापित करे। त्रिरावृत्त चतुरस्र पर आधारशक्ति की पूजा कर उस आधार पर आचमनीय-पात्र रख कर 'नमः' इस मन्त्र से अथवा मूलमन्त्र से आचमनीय-पात्र को

तद्दक्षिणे मधुपर्कपात्रं त्रिकोणवृत्तचतुरस्त्रे आधारशक्ति सम्पूज्य, पात्रं साधारं मधुघृतशर्करादधिदुग्धयुतं संस्थाप्याऽस्त्रेणाऽष्टकृत्वोऽभिमन्त्र्य, मूलेनाऽभिमन्त्र्य, धेनुयोनिमुद्रे दर्शयेत् ।

तद्दक्षे स्नानीयपात्रं त्रिकोणवृत्तचतुरस्त्रे आधारशक्ति सम्पूज्य, पात्रं साधारं संस्थाप्य, 'नमः' इति मूलेन वा जलेन प्रपूर्य, 'वषट्' इति पुष्पं, 'नमः' इति गन्धं च निक्षिप्य, उशीरं रोचनं च संक्षिप्याऽस्त्रेणाऽष्टकृत्वोऽभिमन्त्र्य, मूलेनाऽभिमन्त्र्य,

---

जल से पूर्ण कर 'वषट्' इस मन्त्र से उसमें पुष्प एवं 'नमः' मन्त्र से गन्ध छोड़े । जाती (जायफल), कपूर, कङ्कोल, लवंग, तमालक आदि का चूर्ण उसमें डालकर अस्त्र के मन्त्र से आठ बार अभिमन्त्रित कर पुनः मूल मन्त्र से अभिमन्त्रित करे और धेनु मुद्रा एवं योनि मुद्रा प्रदर्शित करे ।

साधक को उस आचमन-पात्र के दक्षिण मधुपर्क पात्र स्थापित करना चाहिए। वह इस प्रकार है—त्रिकोण वृत्त चतुरस्र मण्डल पर आधार शक्ति की पूजा कर मधु, घृत, शर्करा, दधि, दुग्ध युक्त पात्र को आधार के सहित स्थापित करे। तदनन्तर अस्त्र मन्त्र से उसे आठ बार अभिमन्त्रित कर मूल मन्त्र से अभिमन्त्रित करे और धेनु-योनिमुद्रा प्रदर्शित करे। फिर मधुपर्क-पात्र के दाहिनी ओर भगवती के स्नानीय पात्र को स्थापित करे। त्रिकोण वृत चतुरस्र मण्डल में आधार शक्ति का पूजन एवं उस पर आधार सहित पात्र स्थापित कर 'नमः' इस मन्त्र से अथवा मूल मन्त्र से उस पात्र में जल भरे। फिर उसमें 'वषट्' इस मन्त्र से पुष्प, 'नमः'

धेनुयोनिमुद्रे दर्शयेत् । तत्रैव श्रीचन्दनादिपुष्पं वक्षो वसन-भूषणादि तत्रैव स्थापयेत् । सामान्यार्घ्यस्थजलेन विशेषजलेन वाऽभिषिच्य, मूलेनाऽष्टवारमभिमन्त्र्य, धेनुयोनिमुद्रे दर्शयेत् ।

एवं सर्ववस्तुशोधनं विशेषजलेनाऽऽत्ममूर्ध्नि भैरवौ तर्पयेत् । श्रीपात्रामृतेन विशेषार्घ्यं पात्रेण वा देवीं हृदि त्रिवारं तर्पयेत् । तर्पणं च तत्त्वमुद्रया । सा चाऽनामिकाऽङ्गुष्ठयोगेन बोध्या ।

इति पात्रस्थापन-विधिः समाप्तः ।

इस मन्त्र से गन्ध, उशीर, रोचन प्रक्षिप्त कर अस्त्र को आठ बार पढ़ कर अभिमन्त्रित करे। पुनः मूल मन्त्र से अभिमन्त्रित कर धेनु-योनि मुद्रा प्रदर्शित करे। तदनन्तर उस स्नानीय पात्र के समीप बायीं ओर श्री चन्दनादि, पुष्प, दायीं ओर भगवती के वस्त्र एवं आभूषणादि स्थापित कर, सामान्य अर्घ्य पात्र के जल से अथवा विशेष अर्घ्य पात्र के जल से उसे अभिसिञ्चित कर मूल मन्त्र से आठ बार अभिमन्त्रित कर धेनु एवं योनि मुद्रा प्रदर्शित करे।

इस प्रकार सभी वस्तुओं को शुद्ध कर विशेष जल से अपने शिर पर भैरव एवं भैरवी का तर्पण करे। पुनः श्रीपात्र के जल से अथवा विशेषार्घ्य पात्र से हृदय स्थल पर तत्त्वमुद्रा से अनामिका एवं अंगुष्ठ को मिला कर तीन बार देवी तर्पण करना चाहिए।

इस प्रकार पात्र-स्थापन-विधि समाप्त।

तत्त्वशुद्धिः

अत्र तत्त्वशुद्ध्याद्यपि कौलिकैराचरणीयम् । तद्यथा—तत्र श्रुतिः । प्राणा-ऽपान-व्यानोदान-समाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे शुद्धयन्तामित्यादि, ॐ प्रकृत्यहङ्कार-बुद्धि-मनः-श्रोत्राणि मे शुद्धयन्तां ज्योतिरह विरजा विपाप्मा भूयासं स्वाहा । ॐ स्पर्श-रूप-रस-गन्धाकाशानि मे शुद्धयन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । ॐ वायु-तेजः-सलिल-भूम्यात्मनो मे शुद्धयन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । इति परामृशन् सप्तधा सर्वाङ्गे ॐ त्वक्-चक्षुर्जिह्वा-घ्राण-वचांसि मे शुद्धयन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । ॐ पाणि-पाद-पायूपस्थशब्दा मे शुद्धयन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ।

इति तत्त्वशुद्धिः ।

तत्त्वशुद्धि—इस विषय में कौलिकों को तत्त्वशुद्धि आदि कार्य करना चाहिये । इस सम्बन्ध में जो सुना जाता है वह मूल में स्पष्ट है । अतः साधक 'प्राणापान' से लेकर अन्तिम 'विपाप्मा भूयासं स्वाहा' पर्यन्त मन्त्र पढ़ कर सात बार सर्वाङ्ग का स्पर्श करे । पुनः 'ॐ त्वक्चक्षु' से लेकर 'विरजा विपाप्मा भूयासं स्वाहा' पर्यन्त मन्त्र पढ़ कर त्वक्, चक्षु, जिह्वा, घ्राण, वचन, पाणि, पाद, पायु-उपस्थ तथा शब्द की शुद्धि करे ।

इस प्रकार तत्त्वशुद्धि समाप्त ।

बटुकादिभ्यो बलिदानम्

ईशान-वह्नि निर्ऋति-वायुकोणेषु-मण्डलानि विधाय, बटुक-योगिनी गणेश-क्षेत्रपाल-भूतेभ्यः सम्पूज्य, बटकादिबलिं दद्यात्। मण्डलमभ्यर्च्य, बटकादिद्रव्यं संस्थापयेत्। ॐ एह्येहि देवी पुत्र-कपिल-जटाभार-भास्वरज्वालामुख-सर्वविघ्नान् नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा। अनेनाऽङ्गुष्ठानामिकायोगेन ईशाने बटुकाय बलिं दद्यात्।

'ऊर्ध्वं ब्रह्माण्डतो वा दिविगतसुतले भूतले निष्कले वा
पाताले वाऽनले वा सलिलपवनयोर्यत्र तत्र स्थिता वा।
क्षेत्रे पीठोपपीठादिषु कृतसुपदाः पुष्पधूपादिकेन
प्रीता देव्यः सदा ता शुभबलिविधिनाऽऽयान्तु देवेन्द्रतुल्याः॥'

'यांयींयूंयैंयौंयः योगिनीभ्यः हूंफट् स्वाहा' अनेन कनिष्ठाऽङ्गुष्ठ-योगेन वह्निकोणे बलिं दद्यात्। 'आंक्षींक्षंक्षैंक्षौंक्षः क्षेत्रपालधूप-

---

तत्पश्चात् पूजा-स्थल के चारों ओर ईशान, आग्नेय, नैर्ऋत्य तथा वायव्य कोण में मण्डल निर्माण कर क्रमशः प्रत्येक में बटुक, योगिनी, गणेश, क्षेत्रपाल एवं भूतों की पूजा कर तत्तत्कोणों में बटक आदि की बलि प्रदान करे। सर्व-प्रथम मण्डल का पूजन कर उस पर बलिदान के लिए 'बटक' (बड़ा) आदि पदार्थ रखे। तथा 'ॐ एह्येहि' से गृह्ण-गृह्ण स्वाहा' पर्यन्त मन्त्र पढ़ कर अनामिका एवं अङ्गुष्ठ उँगलियों को मिला कर ईशान कोण में बटुक को बटक की बलि दे।

पुनः 'ऊर्ध्व ब्रह्माण्डतो' से लेकर 'योगिनीभ्यः हूंफट् स्वाहा' पर्यन्त श्लोक तथा मन्त्र पढ़ कर कनिष्ठा-अंगुष्ठ अँगुलियों को मिला

दीपादि-सहितं बलिं गृह्ण गृह्ण स्वाहा' अङ्गुष्ठतर्जनीभ्यां वायुकोणे बलिं दद्यात् । 'गांगींगूंवरवरदसर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा' मुष्टिमध्यस्थामङ्गुलीं दण्डवत् कृत्वा, नैर्ऋते बलिं दद्यात् । वामभागे मण्डलं कृत्वा, साधारपात्रं संस्थाप्य, तत्र बलिद्रव्यं दत्त्वा, सेकादि कृत्वा, 'ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हूं फट् स्वाहा' इत्यनेन तत्त्वमुद्रया भूतेभ्यो बलिं दद्यात् । इदं बलिदानं वस्तुतः पुरश्चरणे एव कर्त्तव्यम् ।

सुवर्णस्फटिकादौ काश्मीरमृगनाभिमलयोद्भवरक्तचन्दनादिद्रव्येण 'आसुरेखे वज्ररेखे हूं फट् स्वाहा' इति मन्त्रेण च षट्कोणगर्भं त्रिकोणत्रयाष्टदलभूपुरात्मकं यन्त्रं लिखेत् । तत्र पञ्चगव्येन पञ्चामृतेन च प्रक्षाल्य, प्राणप्रतिष्ठामन्त्रेण

कर आग्नेय कोण में योगिनियों को 'क्षां क्षीं' से 'गृह्ण गृह्ण स्वाहा' पर्यन्त मन्त्र पढ़ कर वायुकोण में अङ्गुष्ठ एवं तर्जनी अङ्गुलियों को मिला कर क्षेत्रपाल को धप-ीपादि सहित बलि प्रदान करे । इसी प्रकार 'गां गीं' से लेकर गृह्ण गृह्ण स्वाहा' पर्यन्त मन्त्र पढ़ कर बांयें हाथ की मुट्ठी में दाहिने हाथ की अङ्गुलियों को डण्डे के समान खड़ी कर नैर्ऋत्य कोण में नैर्ऋत्य को बलि देवे । तथा बाँयीं ओर मण्डल बना कर आधार सहित पात्र रख उस पर बलि द्रव्य रख कर उसे जल से सिञ्चित कर 'ॐ ह्रीं सर्व' से लेकर फट् स्वाहा' पर्यन्त मन्त्र पढ़ कर तत्त्वमुद्रां से भूतगणों को बलि प्रदान करे । इस प्रकार का बलिदान वस्तुतः पुरश्चरण में ही करना चाहिए ।

तत्पश्चात् सुवर्ण अथवा स्फटिक पात्र पर केशर, कस्तूरी, मलयाचल तथा रक्तचन्दनादि मिश्रित द्रव्य से 'आसुरेखे वज्ररेखे हूं फट् स्वाहा' इस मन्त्र से षट्कोण के बीच तीन त्रिकोणात्मक अष्ट-

अष्टोत्तरशतकृत्वः प्राणान् प्रतिष्ठाप्य । मन्त्रो यथा—आंह्रीं-क्रोंयंरंलंवंशंषंसंहों ॐ क्षंसंहंसः ह्रीं ॐ हंसः श्रीमद्दक्षिण-कालिकायाः षट्कोणगर्भत्रिकोणत्रयाष्टदलभूपुरात्मकयन्त्रस्य सजीववाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा' ।

ततः—'ॐ यन्त्रराजाय विद्महे महायन्त्राय धीमहि । तन्नो यन्त्रः प्रचोदयात्' इति दशधा जप्त्वा, दशधा पुष्पाञ्जलिं संक्षिप्य, होमे कृत्वा, प्रतिहोमे हुतशेषं तस्मिन् क्षिपेत् ।

इति बटकादिभ्यो बलिदानम् ।

आधारशक्त्यादिपूजनम्

तत्राधारशक्त्यादिपूजनं कुर्यात् । तद्यथा—'ह्रीं आधार-शक्तिभ्यो नमः' इति सम्पूज्य । ततो रक्तचन्दनपुष्पाक्षत-

---

दलयुक्त भूपुर यन्त्र को लिखे। उसे पञ्चगव्य अथवा पञ्चामृत से प्रक्षालित कर प्राण प्रतिष्ठा मन्त्र को एक सौ आठ बार पढ़ कर उस यन्त्र में प्राण प्रतिष्ठा करनी चाहिए । प्राणप्रतिष्ठा का 'आं ह्रीं' से लेकर 'चिरं तिष्ठन्तु स्वाहा' पर्यन्त मन्त्र है।

पुनः 'ॐ यन्त्रराजाय विद्महे' से लेकर 'तन्नो यन्त्रः प्रचोदयात्' पर्यन्त मन्त्र का दश बार जप तथा दश बार पुष्पाञ्जलि देकर होम करे। होम करने के समय प्रत्येक आहुति से शेष घृत को यन्त्र पर डालता रहे।

इस प्रकार बटुकादि के लिए बलिदान समाप्त ।

तदनन्तर 'ह्रीं आधारशक्तिभ्यो नमः' पर्यन्त मन्त्र पढ़ कर आधारशक्तियों का पूजन करे। पुनः रक्तचन्दन एवं पुष्पमिश्रित

पुञ्जं निधाय, 'ॐ जयायै नमः' 'ॐ विजयायै नमः' 'ॐ अजितायैं नमः' 'ॐ अपराजितायै नमः' 'ॐ नित्यायै नमः' 'ॐ विलासिन्यै नमः' 'ॐ दोग्ध्र्यै नमः' 'ॐ अघोरायै नमः' 'ॐ मङ्गलायै नमः' इति पीठशक्तीरभ्यर्च्य, 'ह्रींकालिका-योगपीठात्मने नमः' 'ह्ः सौं सदाशिवमहाप्रेतपद्मासनाय नमः' इत्यभ्यर्च्य, ततो देवीं यजेत् ।

इति आधारशक्त्यादिपूजनम् ।

ध्यानादिपूजाविधिः

हस्ते पुष्पाक्षतपुञ्जं निधाय, कूर्ममुद्रां विधाय, कुलकुण्डलिनीं हृदयदेशे आनीय, तन्मुखे प्रक्षिप्य, तां परब्रह्मणि सङ्गमय्य चन्द्रमण्डलान्तर्गताऽमृतलोलीभूतां द्विदले सन्निवेश्य, वाम-नासापुटेन 'यम्' इति निष्कृत्य, पूर्वं कामकलां ध्यायेत् ।

अक्षतपुञ्जों को आधारशक्ति पर रख कर, उन अक्षतपुञ्जों पर 'ॐ जयायै नमः' से लेकर 'ॐ मङ्गलायै नमः' पर्यन्त मन्त्र पढ़ कर पीठशक्तियों की अर्चना करे। तथा 'ह्रींकालिका' से लेकर 'पद्मा-सनाय नमः' पर्यन्त दो मन्त्रों को पढ़ कर अर्चना करे एवं महादेवी का यजन करे।

हाथ में पुष्प तथा अक्षत-पुञ्ज लेकर कूर्ममुद्रा धारण कर कुल-कुण्डलिनी को हृदय स्थान में लाकर अक्षतादि उसके मुख में रख उसे परब्रह्म के साथ युक्त कर चन्द्रमण्डलान्तर्गत अमृत के लिए लालायित कुण्डलिनी को द्विदल पर बैठा कर बाँयें नासिका के छिद्र से 'यम्' इस मन्त्र को पढ़ कर खींचते हुए काम कला का

'मुखं विन्दुवदाकारं तदधःकुचयुग्मकम् ।
तदधःसपराङ्गं च सपरिष्कृतमण्डलम् ॥'

ततः पुष्पादिचक्रे क्षिपेत् । देवीं ध्यात्वा, आवाहयेत् ध्यानं च—

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥ १ ॥
सद्यश्छिन्नशिरःखड्गवामोर्ध्वाधःकराम्बुजाम् ।
अभयं वरदं चैव दक्षिणाधोर्ध्वपाणिकाम् ॥ २ ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बराम् ।
कण्ठावशक्त-मुण्डाली-गलद्रुधिर-चर्चिताम् ॥ ३ ॥
कर्णावतंसतानीत-शवयुग्म-भयानकाम् ।
घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधराम् ॥ ४॥
शवानां करसङ्घातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥ ५ ॥
घोररूपां महारौद्रीं श्मशानालयवासिनीम् ।
दन्तुरां दक्षिणव्यापि-मुक्तलम्बकचोच्चयाम् ॥ ६ ॥
शवरूपमहादेव - हृदयोपरिसंस्थिताम् ।
शिवाभिर्घोररूपाभिश्चतुर्दिक्षु समन्विताम् ॥ ७ ॥
महाकालेन सार्द्धोर्द्ध्वमुपविष्टरतातुराम् ।
सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ।
एवं सञ्चिन्तयेद् देवीं श्मशानालयवासिनीम् ॥ ८ ॥

'मुखं विन्दु' से प्रारम्भ कर 'सपरिष्कृतमण्डलं' पर्यन्त श्लोक द्वारा ध्यान कर पुष्पादिकों को यन्त्र चक्र में छोड़ दे । पुनः 'करालवदनां' से 'श्मशानालयवासिनीम्' पर्यन्त आठ श्लोकों द्वारा महादेवी महाकाली का ध्यान करे ।

अथवा हंसतन्त्रोक्तं ध्यानं कुर्यात् । तद्यथा—

'नमामि दक्षिणामूर्ति कालिकां परभैरवीम् ।
भिन्नाञ्जनचयप्रख्यां प्रवीरशवसंस्थिताम् ॥ १ ॥
गलच्छोणितधाराभिः स्मेराननसरोरुहाम् ।
पीनोन्नतकुचद्वन्द्वां पीनवक्षो नितम्बिनीम् ॥ २ ॥
दक्षिणां मुक्तकेशालीं दिगम्बरविनोदिनीम् ।
महाकालशवाविष्टां स्मेरानन्दोपरिस्थिताम् ॥ ३ ॥
मुखं सान्द्रस्मितामोद-मोदिनीं मदविह्वलाम् ।
आरक्तमुखसान्द्राभिर्नेत्रालीभिर्विराजिताम् ॥ ४ ॥
शवद्वयकृतोत्तंसां सिन्दूरतिलकोज्ज्वलाम् ।
पञ्चाशन्मुण्डघटित-मालाशोणित-लोहिताम् ॥ ५ ॥
नानामणिविशोभाढ्य-नानालङ्कार-शोभिताम् ।
शवास्थिकृत-केयूर-शङ्ख-कङ्कणमण्डिताम् ॥ ६ ॥
शववक्षःसमारूढां लेलिहानां शवं क्वचित् ।
शवमांसकृतग्रासां साट्टहासं मुहुर्मुहुः ॥ ७ ॥
खड्गमुण्डधरां वामे सव्येऽभयवरप्रदाम् ।
दन्तुरां च महारौद्रीं चण्डनादातिभीषणाम् ॥ ८ ॥
शिवाभिर्घोररूपाभिर्वेष्टितां भयनाशिनीम् ।
मा भैर्मा भैः स्वभक्तेषु जल्पन्तीं घोरनिःस्वनैः ।
यूयं किमिच्छथ ब्रूत ददामीति प्रभाषिणीम्' ॥ ९ ॥

इति ध्यायेत् ।

अथवा हंस तन्त्र में कहे गये विधि के अनुसार 'नमामि दक्षिणामूर्ति' से 'प्रभाषिणीम्' पर्यन्त नव श्लोकों से ध्यान करे ।

आवाहनं च–'आत्मसंस्थामजां शुद्धां त्वामहं परमेश्वरीम् ।
आरण्यमिव हव्यांशं मूर्त्तावावाहयाम्यहम् ॥'

इति मूलं च पठन् 'भगवति दक्षिणकालिकेऽइहागच्छ' इति प्रसारित-संहताङ्गुलीमूलपर्वणोरङ्गुष्ठौ निःक्षिप्य आवाहयेत्।

ततः—'ॐ देवेशि भक्तिसुलभे ! परिवारसमन्विते ।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥
तवेयं महिमामूर्तिस्तस्यां त्वां सर्वगां प्रभो ! ।
भक्तिस्नेह-समाकृष्टा दीपवत् स्थापयाम्यहम् ॥'

इति मूलं पठित्वा, पूर्वोक्तया अधोमुख्या मुद्रया स्थापयेत् ।

'ॐ सर्वान्तर्यामिन्यै देवि सर्वबीजमये शुभे ।
स्वात्मस्थायै परं शुद्धमासनं कल्पयाम्यहम् ॥'

इति मूलं च पठन् पद्ममुद्रया पुष्पाद्यासनं दद्यात् ।

तदनन्तर 'आत्मसंस्थां' से मूर्त्तावावाहयाम्यहम्' इस श्लोक तथा मूल मन्त्र सहित 'भगवति दक्षिणकालिके इहागच्छ' पर्यन्त मन्त्र पढ़कर दोनों हाथ के अङ्गुलियों के मूल एवं पर्व को आगे की ओर झुका कर तथा दोनों अँगूठों को ऊपर कर देवी का आवाहन करे तथा 'ॐ देवेशि' से 'स्थापयाम्यहम्' पर्यन्त श्लोक एवं मूल मन्त्र पढ़ कर पूर्वोक्त मुद्रा से नीचे की ओर दिखाते हुए उन्हें स्थापित करे । पुनः 'ॐसर्वान्तर्यामिन्यै' से 'कल्पयाम्यहम्' पर्यन्त श्लोक तथा मूल मन्त्र को पढ़ते हुए भगवती को पुष्पादि आसन प्रदान करे ।

ततः—'ॐ अस्मिन् वरासने देवि ! सुखासीनेऽक्षरात्मिके ।
प्रतिष्ठिता भवे सा त्वं प्रसीद परमेश्वरि ! ।।'

मूलं च पठन् 'इह प्रतिष्ठिता भव' इति पूर्वोक्तया मुद्रया प्रतिष्ठापयेत् ।

अनन्या तत्र देवेशि ! मूर्तिशक्तिरियं प्रभो ! ।
सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्परे ।।'

मूलं च पठन् 'इह सन्निधेहि' उच्छ्रिताऽङ्गुष्ठमुष्टयोः संयोगात् सन्निधापनमुद्रया सन्निधानं कुर्यात् ।

'ॐ आज्ञया तव देवेशि ! कृपाम्भोधे गुणाम्बुध ! ।
आत्मना चैकदृप्तां त्वां संरुणद्धि महेश्वरि ! ।।'

इति मूलं च पठन्, अन्तःप्रवेशिताङ्गुष्ठ-मुष्टयात्मिकया 'इह सन्निरुध्यस्व' इति सन्निरोधनं कुर्यात् ।

पुनः 'अस्मिन् वरासने' से 'परमेश्वरि' पर्यन्त श्लोक तथा मूल मन्त्र के साथ 'इह प्रतिष्ठिता भव' पढ़कर पूर्वोक्त मुद्रा द्वारा भगवती की प्रतिष्ठा करे। पुनः 'अनन्या तत्र देवेशि' से 'भक्तानुग्रहतत्परे' पर्यन्त श्लोक एवं मूल मन्त्र के सहित 'इह सन्निधेहि' पढ़कर ऊपर की ओर दोनों हाथ की मुट्ठी तथा अँगूठे को ऊपर की ओर उठाकर सन्निधापन मुद्रा द्वारा भगवती का सन्निधान स्थापित करे।

पुनः 'आज्ञया तव' से 'महेश्वरि' पर्यन्त श्लोक एवं मूल मन्त्र के सहित 'इह सन्निरुध्यस्व' उच्चारण कर दोनों हाथ के अँगूठों को

'अज्ञानाद् दुर्मनस्त्वाद् वा वैकल्या साधकस्य च।
मम ऊनं भवेत् कृत्यं तदाप्याभिमुखी भव ॥'

इति मूलं च पठन् 'इह सम्मुखी भव' इति उत्तान-मुष्टियुगलात्मिकया सम्मुखीकरणं कुर्यात्।

ततो 'हूम्' इत्यनेन सव्यहस्तमुष्टिदीर्घाधोमुखतर्जन्यात्मिकयाऽभितो भ्रामितयाऽवगुण्ठयेत्।

ॐ दशपीयूषवर्षिण्या पूरयेद्यज्ञविष्टरम्।
मूर्त्तौ वा यज्ञसम्पूर्त्तौ स्थिरा भव महेश्वरि ! ॥

देवताङ्गे षडङ्गन्यासात्मकं सकलीकरणं कुर्यात्। तद्यथा—

'क्रां हृदयाय नमः, क्रीं शिरसे स्वाहा, क्रूं शिखायै वषट्, क्रैं कवचाय हूम्, क्रौं नेत्रत्रयाय वौषट्, क्रः अस्त्राय फट्'।

दोनों हाथ की मुट्ठी में रखकर देवी का सन्निरोधन करे। पुनः 'अज्ञानाद् दुर्मनस्त्वाद् वा' से 'अभिमुखी भव' पर्यन्त तथा मूल मन्त्र के सहित 'इह सम्मुखी भव' मन्त्र पढ़कर दोनों मुट्ठियों को उत्तान कर देवी को अपने सम्मुख स्थापित करे।

तत्पश्चात् 'हूम्' इस मन्त्र से बांये हाथ की मुट्ठी तथा तर्जनी अँगुलि को फैला कर उसे नीचे की ओर करके चारों ओर घुमा कर घेर देवे। पुनः 'ॐ दशपीयूष' से 'महेश्वरि' पर्यन्त श्लोक पढ़कर देवता के अङ्ग में षडङ्गन्यास कर मूर्ति को कला से युक्त करे।

षडङ्गन्यास की विधि—'क्रां हृदयाय नमः' से लेकर 'क्रः अस्त्राय फट्' पर्यन्त मन्त्रों को पढ़कर हृदयादि का स्पर्श करते हुए न्यास करे।

ततः—'स्वभक्तवाङ्-मनश्चक्षुः-श्रोत्रदूरार्पितस्थिते ।
स्वतेजःपुञ्जरेणाशु वेष्टिता भव सर्वतः ॥'

स्वधाबीजेन धेनुमुद्रया अमृतीकरणम् । ततो महामुद्रया परमीकरणम् । महामुद्रा यथा—

'अन्योन्यग्रथिताङ्गुष्ठा-प्रसारित-पराङ्गुलिः ।
महामुद्रेयमुदिता परमीकरणे प्रिये ! ॥'

तथा—'ॐ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ।
तस्यै ते परमेशान्यै आगतं स्वागतं च मे ॥'

मूलं च पठन् 'साङ्गे सायुधे सवाहने सावरणे श्रीमद्दक्षिणकालिके तव स्वागतम' इति प्रसारिताङ्गुल्यधोमुखकरद्वयेन स्वागतं कुर्यात् ।

'ॐ कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं च मे ।
आगता देवदेवेशि सुस्वागतमिदं पुनः ॥'

मूलं च पठन्नूर्ध्वमुख्या पूर्वोक्तमुद्रया सुस्वागतं कुर्यात् ।

तदनन्तर 'स्वभक्तवाङ्' से सर्वतः' पर्यन्त मन्त्र पढ़कर 'स्वधा' इस बीज मन्त्र से धेनुमुद्रा दिखाकर कला को अमृतमय बना कर महामुद्रा दिखा कर 'परमीकरण' करे । महामुद्रा का स्वरूप है—दोनों हाथ के अँगूठों को एक दूसरे से ग्रथित कर अन्य अङ्गुलियों को खुला रखे । तदनन्तर 'ॐ यस्य दर्शनं' से लेकर 'स्वागतं च मे' पर्यन्त श्लोक एवं मूल मन्त्र सहित 'साङ्गे' से लेकर 'तव स्वागतम्' पर्यन्त मन्त्र पढ़ते हुए दोनों हाथ की अँगुलियों को फैलाकर उसे नीचे की ओर झुकाकर भगवती का स्वागत करे । पश्चात् 'ॐ कृतार्थो' से लेकर 'सुस्वागतमिदं पुनः' पर्यन्त श्लोक एवं मूलमन्त्र को पढ़ते हुए पूर्वोक्त

लेलिहानमुद्रया प्राणस्थापनं पूर्वोक्तरीत्या कुर्यात्। लेलिहान-मुद्रा यथा—

'तर्जनीमध्यमानामां समां कुर्यादधोमुखीम्।
अनामायां क्षिपेद् बद्धामृजुं कृत्वा कनिष्ठिकाम्।
लेलिहानात्ममुद्रेयं जीवन्यासे प्रकीर्तिता॥'

पूर्वोक्तप्राणस्थापनरीतिर्यथा-आंह्रींक्रोंयंरंलंवंशंषंसंहों ॐ क्षंसंहंसःह्रीं ॐ हंसः श्रीमद्दक्षिणकालिकायाः प्राणा इह प्राणाः। आंह्रींक्रोंयंरंलंवंशंहों ॐ क्षंसंहंसःह्रीं ॐ हंसः श्रीमद्दक्षिणकालिकाया जीव इह स्थितः। आंह्रींक्रोंयंरंलं-वंशंषंसंहों ॐ क्षंसंहंसःह्रीं ॐ हंसः श्रीमद्दक्षिणकालिकायाः सर्वेन्द्रियाणि इह स्थितानि। आंह्रींक्रोंयंरंलंवंशंषंसंहोंसः ॐ

रूप से दोनों हाथ की अँगुलियों को ऊपर उठाकर सुस्वागत करे। और इसी मुद्रा से भगवती के यन्त्र में लेलिहान मुद्रा के द्वारा प्राणप्रतिष्ठित करे। लेलिहान मुद्रा—दोनों हाथ की तर्जनी, मध्यमा तथा अनामिका को समान रूप से एक में मिलाकर नीचे झुकावे अथवा कनिष्ठा को सीधी कर अनामिका में बाँध ऊपर खड़ी करने से लेलिहान मुद्रा हो जाती है। जब यन्त्र में प्राणप्रतिष्ठा करनी हो, तो इस मुद्रा का प्रयोग करना चाहिए। पूर्वोक्त क्रम से प्राण स्थापना की विधि यह है–'आं·ह्रीं' से 'प्राणा इह प्राणाः' पर्यन्त मन्त्र पढ़कर प्राण का, पुनः 'आं-ह्रीं' से - जीव इह स्थितः' पर्यन्त मन्त्र पढ़कर जीव का, 'आं-ह्रीं' से 'सर्वेन्द्रियाणि इह स्थितानि' पढ़कर इन्द्रियों का तथा 'आं-ह्रीं' से 'स्वाहा' पर्यन्त मन्त्र पढ़कर,

क्षंसंहंसः श्रीमद्दक्षिणकालिकाया वाङ्-मन-स्त्वक्चक्षुश्रोत्र-जिह्वा-घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

ततो मूलमन्त्रेणाऽर्घ्योदकेन त्रिः प्रोक्षणम् ।

'शालग्रामे मणौ यन्त्रे नावाहन-विसर्जने ।
प्राणः तिष्ठां च न कुर्यात् ।'

योनिं महायोनिं च बध्वा खड्गमुण्डाऽभयवरमुद्रां दर्शयेत् । महायोनिमुद्रा यथा–

'तर्जन्यनामिके मध्ये कनिष्ठे च क्रमादपि ।
करयोर्योजयेच्चैव कनिष्ठामूलभेदतः ॥
अङ्गुष्ठाग्रं तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ।
अधोमुखीमिमां कृत्वा दर्शयेद् बीजपूर्विकाम् ॥'

बीजम् 'ऐमि'ति । योनिमुद्रायां तु–'अङ्गुष्ठाग्रं तु न निःक्षिपेदिति ।' खड्गादिमुद्रा तु स्पष्टैव ।

वाणी, मन, त्वक्, चक्षु, श्रोत्र, जिह्वा, घ्राण एवं प्राणों को यन्त्र में स्थापित करे, पुनः मूल मन्त्र पढ़ते हुए अर्घ्य पात्र के जल से तीन बार प्रोक्षण करे। शालग्राम में, मणि में एवं यत्र में आवाहन, विसर्जन तथा प्राणप्रतिष्ठा नहीं करनी चाहिए। अतः यन्त्र में ऊपर कही गयी सारी प्राणप्रतिष्ठा की विधि न करे।' योनि मुद्रा अथवा महायोनि मुद्रा प्रदर्शित कर खड्ग, मुण्ड तथा अभय मुद्रा प्रदर्शित करे। दोनों हाथ की तर्जनी, अनामिका, मध्यमा तथा कनिष्ठा अँगुलियों को क्रमशः एक में मिला दे, और दोनों अँगूठों को उसके भीतर सन्निविष्ट कर दे, तो महायोनि मुद्रा होती है। इस मुद्रा को 'ऐं' बीज पढ़कर नीचे की ओर दिखावे। योनि मुद्रा में अँगूठों को भीतर न करे। खड्गादि मुद्रा तो स्पष्ट ही है।

ततः पुष्पाञ्जलिं दद्यात् । तत्र एकं पादे, द्वितीयं जानुनि, तृतीयं नाभौ, चतुर्थं हृदये, मस्तके पञ्चममिति । ततः पाद्यादि दद्यात् । तद्यथा–

'यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः ।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥'

इति मूलं च पठन्, 'इदं पाद्यं दक्षिणकालिकायै निवेदयामि नमः' इति पूर्वोक्तपुष्प-गन्धोशीर-रोचन-श्यामाक-विष्णुकान्ताब्जदूर्वायुतं जलमनामाङ्गुष्ठयोर्योगेन पादयोर्दद्यात् ।

'ॐ वेदानामपि वेदाय देवानां देवतात्मने ।
आचमं कल्पयामीशि ! शुद्धानां शुद्धि हेतवे ॥'

मूलं च पठन् 'इदमाचमनीयं दक्षिणकालिकायै निवेद-

प्राण स्थापन के बाद मन्त्र पढ़कर यन्त्र पर पुष्पाञ्जलि समर्पित करे। पैर पर एकाञ्जलि, जानु पर दूसरी, नाभि पर तीसरी, हृदय पर चौथी तथा मस्तक पर पाँचवीं पुष्पाञ्जलि प्रदान करे। तत्पश्चात् पाद्य प्रदान करे। जो इस प्रकार है—साधक 'यद्भक्ति' से लेकर 'कल्पये' पर्यन्त्र मन्त्र को पढ़ते हुए मूल मन्त्र सहित 'इदं पाद्यं दक्षिणकालिकायै निवेदयामि नमः' पर्यन्त मन्त्र पढ़कर प्रथम रखे गये पुष्प, गन्ध, उशीर, रोचन, श्यामाक, विष्णुकान्ता तथा कमल एवं दूर्वायुक्त जल को अनामिका-अंगुष्ठ को मिलाकर यन्त्र स्थित भगवती के दोनों चरण-कमलों में निवेदित करे। पुनः 'ॐ वेदानां से 'शुद्धिहेतवे' पर्यन्त श्लोक एवं मूल मन्त्र के सहित 'इदमाचमनीयं दक्षिणकालिकायै निवेदयामि' मन्त्र को पढ़कर कनिष्ठा रहित दोनों

यामि' इत्याचमनीयं कनिष्ठाहीनोन्नतसयुक्तचतुरङ्गुलीरूपा-चमनमुद्रया चन्दन-पुष्पजाती-कर्पूर-कङ्कोल-लवङ्ग-तमाल-कादिचूर्णसंयुक्तजलं मुखे दद्यात् ।

'ॐ सर्वकालुष्यहीनायै परिपूर्णसुखात्मने ।
मधुपर्कमिदं देवि ! कल्पयामि प्रसीद मे ।।'

मूल च पठन् संयुक्ताधोमुखानामिकास्पृष्टाङ्गुष्ठात्मिकया मधु-घृत-शर्करा-दधि-दुग्ध-सङ्घातात्मकं मधुपर्कं मुखे दद्यात् ।

'ॐ उच्छिष्टोऽप्यशुचिर्वाऽपि यस्याः स्मरणमात्रतः ।
शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम् ।।'

इति मूलं च पठन्, पूर्ववदाचमनीयं मुखे दद्यात् ।

'ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम् ।
तापत्रयविनिर्मुक्तं तवाऽर्घ्यं कल्पयाम्यहम् ।।'

हाथ की चारों अँगुलियों को ऊपर कर आचमन मुद्रा से चन्दन, पुष्प, जाति, कपूर, कङ्कोल, लवङ्ग, तमाल आदि के चूर्ण से युक्त जल आचमन के लिए भगवती के मुख में समर्पित करे ।

पुनः 'ॐ सर्वकालुष्यहीनायै' से 'प्रसीद मे' पर्यन्त तथा मूल मन्त्र को पढ़ते हुए अनामिका से युक्त अंगुष्ठ को एक में मिला कर उसे अधोमुख कर मधु, घृत, शक्कर, दही, दूध मिश्रित मधुपर्क प्रदान करे । फिर 'ॐ उच्छिष्ट' से 'पुनराचमनीयकम्' पर्यन्त श्लोक एवं मूल मन्त्र को पढ़ते हुए यन्त्र स्थित भगवती के मुख में पुनः आचमन प्रदान करे । 'ॐ तापत्रयहरं' से 'कल्पयाम्यहम्' पर्यन्त श्लोक तथा

इति मूलं च पठन् 'इदमर्घ्यं दक्षिणकालिकायै निवेदयामि, एषोऽर्घः श्रीमद्दक्षिणकालिकायै स्वाहा' इत्यनेन पठितेन कुशाग्रा-ऽक्षत-तिल-व्रीहि - यवाज्य - सिद्धार्थ - पुष्प - मिश्रित-जलात्मकार्घ्यं शिरसि सर्वाङ्गुलीसंयोगेन दद्यात् ।

ततो हरिद्राद्युद्वर्त्तनद्रव्यं तैलं च दद्यात् ।

'ॐ स्नेहं गृहाण स्नेहेन लोकमातर्महाशये ।
सर्वलोकेषु शुद्धात्मन् ददामि स्नेहमुत्तमम् ॥'

मूलं च पठन्, इदं हरिद्रादिद्रव्यं तैलं च दक्षिणकालिकायै निवेदयामि नमः' इत्युक्त्वा उद्वर्त्तयेत् ।

'ॐ परमानन्दबोधाब्धि - निमग्ननिजमूर्त्तये ।
साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश्वरि ! ॥'

मूलं च पठन् 'इद स्नानीयं दक्षिकालिकायै निवेदयामि, इदं स्नानीयं दक्षिणकालिकायै नमः' इति पठित्वा, कनिष्ठा-

---

मूल मन्त्र सहित 'इदमर्घ्यं' से 'स्वाहा' पर्यन्त मन्त्र का पाठ कर कुशाग्र, अक्षत, तिल, व्रीहि, यव, आज्य, श्वेतसर्षप एवं पुष्प मिश्रित जल को सभी अँगुलियों को एक में मिलाकर शिर पर प्रदान करे।

पुनः हरिद्रादि उद्वर्त्तन द्रव्य एवं तेल समर्पित करे। उसकी विधि इस प्रकार है—ॐ स्नेहं गृहाण' से लेकर 'उत्तमम्' पर्यन्त श्लोक पढ़ कर मूल मन्त्र के सहित 'इदं हरिद्रादिद्रव्यं' से लेकर 'निवेदयामि नमः' पर्यन्त मन्त्र पढ़ कर देवी के अङ्गों में उद्वर्त्तन करे। फिर 'ॐ परमानन्द' से 'ईश्वरि' पर्यन्त श्लोक पढ़ते हुए मूल मन्त्र सहित 'दक्षिणकालिकायै नमः' पर्यन्त मन्त्र पढ़ कर कनिष्ठा रहित

हीनदक्षहस्तमुष्टयात्मिकया मुद्रया स्नानीयं दद्यात्। शतकृत्वः सहस्रकृत्वो यथाशक्ति वा मूलं पठन् स्नपयेत्।

'ॐ मायाचित्र - पटच्छन्न - निजगुह्योरुतेजसे।
निवारणाय विज्ञानवासस्ते कल्पयाम्यहम्॥'

मूलं च पठन् 'इदं वासो दक्षिणकालिकायै' इत्याद्युक्तवाक्येन उत्तानदक्षिणहस्ताङ्गुष्ठ-स्पृष्टतन्मध्यमात्मिकया रक्तं वासो दद्यात्।

'ॐ यामाश्रित्य महादेवो जगत्संहारकः सदा।
तस्यै ते परमेशान्यै कल्पयाम्युत्तरीयकम्॥'

इदमुत्तरीयं दक्षिकालिकायै इत्यादिवाक्येन पूर्वोक्तमुद्रयोत्तरीयं दद्यात्। ततो मूलेनाऽष्टोत्तरसहस्रशतदशान्यतमवारं गन्धोदकैर्देवीमभिषिञ्चेत्।

दाहिने हाथ के मुट्ठी की मुद्रा से स्नानीय जल प्रदान करे। एक सौ बार, एक हजार बार, या शक्ति के अनुसार मूल मन्त्र का जप करते हुए भगवती को स्नान करावे। और 'ॐ मायाचित्र' से 'कल्पयाम्यहम्' पर्यन्त श्लोक तथा मूल मन्त्र के सहित 'इदं वासो' से 'दक्षिणकालिकायै नमः' पर्यन्त मन्त्र पढ़ कर दाहिने हाथ को उत्तान कर दाहिने हाथ के अँगूठे से स्पृष्ट मध्यमाङ्गुलि की मुद्रा से देवी को लाल वस्त्र पहनावे। 'ॐ यामाश्रित्य महादेवो' से 'उत्तरीयकम्' पर्यन्त श्लोक तथा मूल मन्त्र के सहित 'दक्षिणकालिकायै नमः' पर्यन्त मन्त्र पढ़ कर पूर्वोक्त मुद्रा से उत्तरीय वस्त्र समर्पित करे। पश्चात् मूल मन्त्र का १०८, १००८, एक सौ अथवा दश बार जप कर सुगन्ध युक्त जल से देवी का अभिषेक करना चाहिए।

'ॐ स्वभावसुन्दराङ्गायै नानाशक्त्याश्रिते शिवे !।
भूषणानि विचित्राणि कल्पयाम्यमरार्चिते ॥'

'एतानि भूषणानि दक्षिणकालिकायै निवेदयामि नमः' इति वाक्येन दक्षहस्ताङ्गुष्ठस्पृष्टाऽनामिकात्मिकया मुद्रया भूषणानि दद्यात्। मूलमन्त्रेण सम्पुटितं प्रत्येकमातृकाक्षरं पठन् देवताङ्गेषु विन्यसेत्।

'ॐ परमानन्दसौभाग्य - परिपूर्णदिगन्तरे।
गृहाण परमं गन्धं कृपया परमेश्वरि ! ॥'

मूलं च पठन् 'इदं चन्दनं श्रीदक्षिणकालिकायै नमः' इति वाक्येन कर्पूरमिश्रित-श्रीखण्डचन्दनं बहुचन्दनं च कनिष्ठाङ्गुष्ठसंयोगेन देव्यङ्गे निवेदयेत्।

'ॐ अक्षतान् धवलान् देवि सुवर्णरौप्यमयीकृतान्।
गृहाण जगदीशाने प्रसीद परमेश्वरि ! ॥

तदनन्तर 'ॐ स्वभाव' से 'निवेदयामि नमः' पर्यन्त मन्त्र पढ़कर दाहिने हाथ के अँगूठे से अनामिका अँगुलि को स्पर्श की गई मुद्रा से भगवती को आभूषण प्रदान करे। तथा मूल मन्त्र से सम्पुटित मातृकाक्षरों को पढ़ते हुए तत्तद्देवताओं को अनेक अङ्ग में स्थापित करे। पश्चात् 'ॐ परमानन्द' से 'परमेश्वरि' पर्यन्त श्लोक तथा मूल मन्त्र के सहित 'इदं चन्दनं' से 'नमः' पर्यन्त वाक्य पढ़ते हुए कर्पूर से मिले हुए श्रीखण्ड चन्दन, एवं अन्य प्रकार के बहुत से चंदनों को देवी के अङ्ग में लगावे। फिर 'ॐ अक्षतान्' से 'परमेश्वरि'

मूलं च पठन् 'साङ्गायै सायुधायै सवाहनायै सपरिवारायै श्रीदक्षिणकालिकायै निवेदयामि नमः' इति वाक्येन सर्वाङ्गुलीभिर्दद्यात् । ततः--

'ॐ तुरीयवनसम्भूतं नानागुणमनोहरम् ।
अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥'

'एतानि पुष्पाणि दक्षिणकालिकायै वौषट्' इति मूलं च पठन् तर्जन्यङ्गुष्ठायोगेन दद्यात् । यथोत्पन्नमपर्युषितमच्छिद्रं नवं शुभं पुष्पं दद्यात् । अञ्जलिदाने त्वधोमुखता न दोषाय, 'श्वेतरक्त-जपापुष्प-करवीर-तगर-जाती-सेवन्ती-यूथिका-धत्तूराशोक-बकुल-श्वेतकृष्णापराजिताबकपुष्प-बिल्वपत्र-चम्पकनागकेशर- मल्लिका-झिणिका-काञ्चीबर्बराक-रक्तपद्मपुष्पामलककोकनद-बन्धूक-केतक्याद्यन्यतमपुष्पं निवेदयेत् । अर्कमन्दारौ

पर्यन्त श्लोक तथा मूल मन्त्र के सहित 'साङ्गायै' से लेकर 'नमः' पर्यन्त वाक्य को पढ़ते हुए सभी अँगुलियों से अक्षत चढ़ावे। 'ॐ तुरीयवन' से 'उत्तमम्' पर्यन्त श्लोक तथा 'एतानि' से 'वौषट्' पर्यन्त वाक्य तथा मूल-मन्त्र को पढ़ते हुए तर्जनी-अँगूठे को मिला कर पुष्प समर्पित करे। पुष्पाञ्जलि निवेदित करते समय अञ्जुली को अधोमुख करने में कोई दोष नहीं है, अतः धवल, रक्त, जपापुष्प, करवीर (कनैल), तगर, जाती, सेवन्ती, यूथिका, धतूर, अशोक, बकुल, श्वेत एवं कृष्ण वर्ण की अपराजिता, बकपुष्प, विल्वपत्र, चम्पक, नागकेशर, मल्लिका, झिणिका, काञ्ची, बर्बराक, रक्त कमलपुष्प, आमलक, कोकनद, बन्धूक, केतकी आदि पुष्पों में से कोई भी पुष्प भगवती को निवेदन करे। अर्क एवं मन्दार

अतिप्रशस्तौ । तुलसीं मालतीं वर्जयेत् । दूर्वया नाऽर्चयेत् धूपभाजनं 'फट्' इति सम्प्रोक्ष्य, 'नमः' इत्यभ्यर्च्य, वायुबीजेन द्वादशवारजप्तेन संशोष्य, वामहस्ततले दक्षहस्तपृष्ठं निवेश्य, 'रम्' इति बीजेन षोडशवारजप्तेन सन्दह्य, वामहस्तपृष्ठ दक्षहस्ततलं निवेश्य, 'वम्' इति षोडशवारजप्तेन धेनुमुद्रयाऽमृतीकृत्य, मूलेनाऽष्टशोऽभिमन्त्र्य, 'जयध्वनि मन्त्रमातः स्वाहा' इति घण्टां सम्पूज्य, वामतर्जन्या संस्पृश्य, मूलं पठन् ।

'ॐ वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥'

'एष धूपः श्रीदक्षिणकालिकायै नमः' इति शङ्खाम्बु प्रक्षिपेद् भूमौ, ततो वामहस्तेन घण्टां वादयन् दक्षतर्जन्यङ्गुष्ठायोगेन धूपमुद्रां दर्शयन् देवतागुणान् कीर्त्तयन् नाभिदेशतो धूपयेत् पुष्पाञ्जलित्रयं दद्यात् ।

अत्यन्त प्रशस्त हैं। तुलसी, मालती तथा दूर्वा के द्वारा काली का पूजन न करे। फिर 'फट्' मन्त्र पढ़ कर धूप के पात्र को स्वच्छ कर, 'नमः' पढ़ कर उसमें पुष्पाक्षत छोड़ पूजा करे। वायु बीज का बारह बार जप कर उसे सुखावे। बाँये हाथ के तलवे पर दाहिने हाथ के पृष्ठ भाग को रख कर 'रम्' इस वह्नि बीज को सोलह बार जप कर धेनु मुद्रा से उसे अमृत बनाकर मूल मन्त्र से आठ बार अभिमन्त्रित कर जयध्वनि मन्त्रमातः स्वाहा' इस मन्त्र से घण्टा का पूजन कर बाँयें हाथ की तर्जनी से घण्टा का स्पर्श कर मूल मन्त्र के सहित 'ॐ वनस्पति' से 'नमः' पर्यन्त दाहिने हाथ की तर्जनी तथा अूगूठे को मिलाकर धूप मुद्रा से देवता के गुणों को वर्णन करते हुए नाभिदेश से ऊपर धूप देवे। पुनः तीन बार पुष्पाञ्जलि देवे।

एवं दीपदानप्रकारः—

'ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।

सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥'

इति, मूलं च पठन् मध्यमाऽङ्गुष्ठायोगेन दीपमुद्रां प्रदर्श्य, नेत्रप्रदेशे दीपं दर्शयेत् ।

घृतदीपो दक्षिणे देहस्तैलदीपो वामतः। स्वर्णादिभाजने साज्यशर्करा-पायसादिकं-परिविष्य, चतुरस्रे निधाय, 'फट्' इति मन्त्रेण चक्रमुद्रयाऽभिरक्ष्य, द्वादशवारजप्तेन 'यम्' इति वायुबीजेन संशोष्य, वामहस्ततले दक्षहस्तपृष्ठे निवेश्य, 'रम्' इति वह्निबीजेन द्वादशवारजप्तेन सन्दह्य, दक्षकराग्रेण संस्पृश्य, 'वम्' इति सुधाबीजेन धेनुमुद्रयाऽमृतीकृत्य, मूलमन्त्रेण

तदनन्तर इसी प्रकार से भगवती को दीप देवे। सर्व प्रथम 'ॐ सुप्रकाशो' से 'प्रतिगृह्यतां' पर्यन्त श्लोक पढ़ कर मूल मन्त्र पढ़े, फिर मध्यमा एवं अँगूठे को मिला कर दीपमुद्रा प्रदर्शित करते हुए नेत्र के सामने दीप दिखावे। घृत का दीपक हो तो दाहिने, तेल का दीपक हो तो बाँयें स्थापित करे। पुनः सुवर्णादि पात्रों में घृत सहित शर्करा युक्त पायस रख कर समतल भूमि में रख कर 'फट्' इस मन्त्र को पढ़ चक्र मुद्रा से रक्षा कर 'यम्' इस वायु बीज का बारह बार जप तथा शोषण क्रिया करे। फिर बाँयें हाथ के तलवे पर दाहिने हाथ का पृष्ठ भाग रख कर 'रम्' इस वह्नि बीज को बारह बार जप कर उसके दोषों को जला कर दाहिने हाथ के अग्रभाग से स्पर्श कर 'वम्' इस सुधा बीज को पढ़ धेनु मुद्रा दिखाते हुए अमृतीकरण एवं मूल मन्त्र पढ़ते हुये दोनों हाथों से

कराभ्यां संस्पृश्य, अष्टधा चाऽभिमन्त्र्य, धेनुमुद्रां प्रदर्श्य, गन्ध-पुष्पैः समभ्यर्च्य, तत्त्वाख्यमुद्रया देव्यै नैवेद्यं निवेदयेत् ।'

'ॐ सत्पात्रसिद्धं स-हविर्विविधानेकभक्षणम् ।
निवेदयामि देवेशि ! कृपया त्वं गृहाण तत् ॥'

इति पठन् ग्रासमुद्रां प्रदर्श्य, शङ्खोदकेन निवेदयेत् । ततः—

'ॐ समस्तदेवदेवेशि ! सर्वावाप्तिकरं परम् ।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ॥'

इति पानीयमाचमनीयं च दत्त्वा, चुलुकं विधिवद् दद्यात् ।

पञ्चमुद्राः प्राणापानसमानोदानव्यानाख्याः प्रदर्शयेत् । तद्यथा-कनिष्ठानामिकाभ्यां प्राणमुद्रा । मध्यमातर्जनीभ्यामपानाख्या । अनामामध्यमाभ्यां समानाख्या । अनामातर्जनीभ्यामुदानाख्या । सर्वाङ्गुलीभिर्व्यानाख्या । ततो मूलेन ताम्बूलं

स्पर्श कर अथवा आठ बार अभिमन्त्रित कर धेनु मुद्रा दिखाते हुए गन्ध, पुष्प से अर्चित कर तत्त्व मुद्रा से देवी को नैवेद्य अर्पित करे। 'ॐ सत्पात्रसिद्धं' से गृहाण तत्' मन्त्र पढ़ते हुए ग्रास मुद्रा दिखा कर शङ्खस्थ जल से नैवेद्य लगावे । तदनन्तर 'ॐ समस्तदेव-देवेशि' से 'जलमुत्तमम्' पर्यन्त मन्त्र पढ़ कर नैवेद्य के मध्य में जल तथा आचमन देकर विधिपूर्वक एक चिल्लू जल देना ।

पुनः प्राणापान, समान, व्यान एवं उदान मुद्रा दिखावे । जो इस प्रकार है—कनिष्ठा-अनामिका को मिलावे, तो प्राणमुद्रा, मध्यमा, तर्जनी को मिलाने से अपान मुद्रा, अनामिका-मध्यमा को मिलावे तो समान मुद्रा, अनामिका-तर्जनी को मिलाने से उदान मुद्रा एवं सभी अँगुलियों को मिला देने से व्यान मुद्रा होती है ।

साधकस्तत्त्वमुद्रया एला - लवङ्ग - कर्पूर - जातीफलादिसंयुतं तमालदलकर्पूरपूगैरितं मुदान्वितो ध्यायन् 'फट्' इति सम्प्रोक्ष्य 'नमः' इत्यभ्यर्च्य, वायुबीजेन द्वादशवारजप्तेन संशोष्य। वामहस्ततलं दक्षहस्तपृष्ठे निवेश्य, 'रम्' इति बीजेन द्वादशवारजप्तेन सन्दह्य, वामहस्तपृष्ठे दक्षहस्ततलं निवेश्य, 'वम्' इति सुधाबीजेन धेनुमुद्रयाऽमृतीकृत्य, मूलेनाऽष्टवारमभिमन्त्र्य,

'ॐ एला-लवङ्ग-कर्पूर-नागवल्लीदलैर्युतम्।
पूगभागैरितं देवि ! ताम्बूलं गृह्यतां नमः॥'

मूलं पठन् 'इदं ताम्बूलं श्रीदक्षिणकालिकायै निवेदयामि नमः' इति मुखप्रदेशे तत्त्वमुद्रया दद्यात्। ततः पुष्पाञ्जलिं गृहीत्वा,

---

साधक तत्त्वमुद्रा प्रदर्शित कर एला, लवङ्ग, कपूर तथा जातीफल से संयुक्त, सुरती, कपूर, सोपारी से संयुक्त ताम्बूल का ध्यान करे। 'फट्' इस मन्त्र को पढ़कर प्रोक्षण करे, 'नमः' मन्त्र पढ़ कर अर्चना करे, वायु बीज 'यम्' इस मन्त्र को बारह बार पढ़कर शोषण करे। बांयें हाथ के तलवे को दाहिने हाथ के पृष्ठ भाग पर रख कर 'रम्' इस वह्निबीज को बारह बार जप कर उसके दोषों को जलाकर बांयें हाथ के पृष्ठ पर दाहिने हाथ का तलवा रखकर 'वम्' इस सुधा बीज से धेनु मुद्रा प्रदर्शित कर उसका अमृतीकरण एवं मूल मन्त्र को आठ बार पढ़कर उसका अभिमन्त्रण कर 'ॐ एला' से 'नमः' पर्यन्त श्लोक पढ़कर मूलमन्त्र से युक्त 'इदं ताम्बूलं श्रीदक्षिण-कालिकायै निवेदयामि नमः' पर्यन्त मन्त्र पढ़कर भगवती के मुख में तत्त्व मुद्रा से ताम्बूल अर्पित करे। पुनः हाथ में पुष्पाञ्जलि

'ॐ संविन्मये परेशानि परामृते चरुप्रिये ! ।
अनुज्ञां दक्षिणे देहि परिवारार्चनाय मे ॥'

तत्र प्रथमं षडङ्गपूजा । अग्नीशासुरवायव्येषु मध्ये दिक्षु च षडङ्गशक्तीः पूजयेत् । तासां ध्यानं तु—

'तुषार-स्फटिक-श्याम-नीलकृष्णारुणास्तथा ।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥'

इति ध्यात्वा, 'हृदयदेवते इहागच्छ इह तिष्ठ क्रां हृदयाय नमः श्रीपादुकां पूजयामि' इति सम्पूज्य, ततः 'शिरोदेवते इहागच्छ इह तिष्ठ क्रीं शिरसे स्वाहा श्रीपादुकां पूजयामि' 'शिखादेवते इहागच्छ इह तिष्ठ क्रूं शिखायै वषट् श्रीपादुकां पूजयामि' 'कवचदेवते इहागच्छ इह तिष्ठ क्रैं कवचाय हुम् श्रीपादुकां पूजयामि' 'नेत्रत्रयदेवते इहागच्छ इह तिष्ठ क्रौं

लेकर 'ॐ संविन्मये' से 'परिवारार्चनाय मे' पर्यन्त श्लोक पढ़कर पुष्पाञ्जलि समर्पित करे ।

आवरण-पूजा के पहले षडङ्ग पूजा करे । यन्त्र के अग्नि, ईशान, नैऋर्त्य, वायव्य कोण के मध्य में तथा दिशाओं में षडङ्ग शक्तियों का पूजन करना चाहिए ।

;तुषारस्फटिक' से 'प्रधानतनवः स्त्रियः' पर्यन्त मन्त्र पढ़ कर उन षडङ्ग शक्तियों का ध्यान करे । एवं 'हृदयदेवते' से 'श्रीपादुकां पूजयामि' पर्यन्त मन्त्र पढ़कर हृदय स्थान में पूजन करे, फिर 'शिरोदेवते' से 'श्रीपादुकां पूजयामि' पर्यन्त मन्त्र पढ़ कर सिर में तथा 'शिखा-देवते' 'श्रीपादुकां पूजयामि' पर्यन्त पढ़कर शिखा में तथा 'कवच-देवते' से 'श्रीपादुकां पूजयामि' पढ़कर दोनों हाथों पर । तदनन्तर 'नेत्रत्रयदेवते' से 'श्रीपादुकां पूजयामि' पढ़कर दोनों नेत्र तथा भ्रू

नेत्रत्रयाय वौषट् श्रीपादुकां पूजयामि' 'अस्त्रदेवते इहागच्छ इह तिष्ठ क्रः अस्त्राय फट् श्रीपादुकां पूजयामि।

ततो वायव्यादीशानपर्यन्त-गुरुपङ्क्तिं पूजयेत्।
तत्र गुरुक्रमो यथा—

'महादेवी महादेवस्त्रिपुरश्चैव भैरवः।
दिव्यौघा गुरवः प्रोक्ता सिद्धौघान् कथयामि ते ॥ १ ॥
ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः।
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ॥ २ ॥
माया मायावती चैव मानवौघाच्छृणुष्व मे।
विमलः कुशलश्चैव श्रीमत्सेनः सुधाकरः ॥ ३ ॥
प्रह्लादः सनकश्चैव वसिष्ठो बोध एव च।
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥ ४ ॥
मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ।
समयानन्दसन्तोषौ कालिकागुरवस्तथा ॥ ५ ॥

स्थल पर फिर 'अस्त्रदेवते' से 'श्रीपादुकां पूजयामि' पढ़कर चारों ओर ताली बजाते हुए देवताओं का पूजन करे।

पुनः वायव्य से ईशानकोण पर्यन्त गुरुपंक्ति का पूजन करे। गुरुक्रम इस प्रकार है—महादेवी, महादेव, त्रिपुर और भैरव इन दिव्यदेवताओं के समूह को दिव्यौघ गुरु कहते हैं। अब सिद्धौघ गुरुओं को कहता हूँ--ब्रह्मानन्द, पूर्णदेव, चलचित्त, चलाचल, कुमार, क्रोधन, वरद, स्मरदीपन, माया और मायावती। मानवौघ गुरुओं के नाम--विमल, कुशल, श्रीमत्सेन, सुधाकर, प्रह्लाद, सनक, वसिष्ठ, बोध, मीन, गोरक्ष, भोजदेव, प्रजापति, मूलदेव, रन्तिदेव, विघ्नेश्वर, हुताशन, समयानन्द, सन्तोष—ये सभी आनन्द-

आनन्दनाथशब्दान्ते गुरवः सर्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्चेदम्बान्ताः परिकीर्तिताः ॥ ६ ॥

ततः पूजा—'महादेव्यम्ब इहागच्छ इह तिष्ठ महादेव्यम्बाश्रीपादुकां पूजयामि। महादेवानन्दनाथ इहागच्छ इह तिष्ठ महादेवानन्दनाथश्रीपादुकां पूजयामि । त्रिपुरानन्दनाथ इहागच्छ इह तिष्ठ त्रिपुरानन्दनाथश्रीपादुकां पूजयामि । भैरवानन्दनाथ इहागच्छ इह तिष्ठ भैरवानन्दनाथश्रीपादुकां पूजयामि । सिद्धौघा इहागच्छत इह तिष्ठत ब्रह्मानन्दानन्दनाथश्रीपादुकां पूजयामि । पूर्णदेवानन्दनाथश्रीपादुकां पूजयामि । चलच्चित्तानन्दनाथश्रीपादुकां पूजयामि । चलाऽचलानन्दनाथश्रीपादुकां पूजयामि । कुमारानन्दनाथश्रीपादुकां पूजयामि । क्रोधानन्दनाथश्रीपादुकां पूजयामि । वरदानन्दनाथश्रीपादुकां पूजयामि । स्मरदीपनानन्दनाथश्रीपादुकां पूजयामि । मायाम्बाश्रीपादुकां पूजयामि । मायावत्यम्बाश्रीपादुकां पूजयामि । इति ।

अथ मानवौघा इहागच्छत इह तिष्ठत । 'विमलानन्दनाथश्रीपादुकां पूजयामि । कुशलानन्दनाथश्रीपादुकां पूजयामि । श्रीमत्सेनानन्दनाथश्रीपादुकां पूजयामि । सुधाकरानन्दनाथश्रीपादुकां पूजयामि । प्रह्लादानन्दनाथश्रीपादुकां पूजयामि ।

नाथ शब्दान्त सिद्धियों को देने वाले गुरु कहे जाते हैं । अम्बाशब्दान्त स्त्रियाँ भी इन गुरुकोटियों में परिगणित हैं ।

तदनन्तर इन गुरुओं की पूजा करे—'महादेव्यम्ब' से 'पूजयामि' पर्यन्त पढ़कर महादेवी की । इसी प्रकार 'महादेवानन्दनाथ' से

सनकानन्दनाथश्रीपादुकां पूजयामि। वसिष्ठानन्दनाथश्रीपादुकां पूजयामि। बोधानन्दनाथश्रीपादुकां पूजयामि। मीनानन्द-नाथश्रीपादुकां पूजयामि। गोरक्षकानन्दनाथश्रीपादुकां पूज-यामि। भोजदेवानन्दनाथश्रीपादुकां पूजयामि। प्रजापत्या-नन्दनाथश्रीपादुकां पूजयामि। मूलदेवानन्दनाथश्रीपादुकां पूजयामि। रन्तिदेवानन्दनाथश्रीपादुकां पूजयामि। विघ्ने-श्वरानन्दनाथश्रीपादुकां पूजयामि। हुताशनानन्दनाथश्रीपादुकां पूजयामि। समयानन्दनाथश्रीपादुकां पूजयामि। सन्तोषा-नन्दनाथश्रीपादुकां पूजयामि।'

ततो निजगुरुं पुरो ध्यात्वा, पञ्चोपचारैः सम्पूज्य। ततः–

'ॐअभीष्टसिद्धिं मे देहि शरणागतपालिके।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम्॥'

इति मूलं च पठन्, पुष्प-चंदनयुतशङ्खोदकेन देव्या वामहस्ते आवरणपूजां समर्पयेत्।

ततो रश्मिवृन्ददेवताः पूजयेत्। तासां ध्यानं यथा–

'सन्तोषानन्दनाथश्रीपादुकां पूजयामि' पर्यन्त इकतीस सिद्धों का तत्त-मन्त्रों से पूजन करे।

पुनः अपने आगे गुरु का ध्यान कर पञ्चोपचार से पूजन करे। 'ॐ अभीष्टसिद्धि' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़कर मूल मन्त्र पढ़ते हुए शंख में स्थापित पुष्प, चन्दन युक्त जल से देवी के बाँयें हाथ में आवरण पूजा समर्पित करे।

तत्पश्चात् रश्मिवृन्द देवताओं का पूजन करे। रश्मिवृन्द के

'सर्वाः श्यामा असिकरा मुण्डमालाविभूषिताः ।
तर्जनीं वामहस्तेन धारयन्त्यश्च सस्मिताः ॥'

बाह्यत्रिकोणस्थ सम्मुखकोणे 'ॐ कालीश्रीपादुकां पूजयामि नमः' इति पाद्यादिभिस्त्रिः कालीं सम्पूजयेत् । एवं देव्या वामे 'कपालिनीश्रीपादुकां पूजयामि नमः' इति । दक्षे 'ॐ कुल्लाश्रीपादुकां पूजयामि' इत्यादि । तदन्तस्त्रिकोणे सम्मुखे 'ॐ कुरुकुल्लाश्रीपादुकां पूजयामि' इत्यादि । वामे 'ॐ विरोधिनीश्रीपादुकां पूजयामि' इत्यादि । दक्षे 'ॐ विप्रचित्ताश्रीपादुकां पूजयामि' इत्यादि । तदन्तस्त्रिकोणे सम्मुखे 'ॐ उग्राश्रीपादुकां पूजयामि' इत्यादि ।

ततो वामे 'ॐ उग्रप्रभाश्रीपादुकां पूजयामि' इत्यादि । दक्षे 'ॐ दीप्ताश्रीपादुकां पूजयामि' इत्यादि । तदन्तस्त्रिकोणे सम्मुखे 'ॐ नीलाश्रीपादुकां पूजयामि' इत्यादि । वामे 'ॐ घनाश्रीपादुकां पूजयामि' इत्यादि । तदन्तस्त्रिकोणे

देवताओं के पूजा का प्रकार इस प्रकार है - साधक सर्वप्रथम 'सर्वाः' से 'सस्मिताः' पर्यन्त श्लोक पढ़ कर रश्मि देवताओं का ध्यान करे। बाह्यत्रिकोण के सम्मुख कोण में 'ॐ कालीश्रीपादुकां पूजयामि नमः' पढ़कर तीन बार पाद्यादि अर्चन-सामग्री से काली का पूजन करे। इसी प्रकार देवी के बाँयें 'ॐ कपालिनी श्रीपादुकां पूजयामि नमः' से कपालिनी का तथा दाहिने, 'ॐ कुल्लाश्रीपादुकां॰' एवं 'ॐ कुरुकुल्लाश्रीपादुकां पूजयामि' से कुरुकुल्ला का। इसी प्रकार पुनः बाँयें 'ॐ विरोधिनीश्रीपादुकां पूजयामि', पुनः दाहिने 'ॐ विप्रचित्ताश्रीपादुकां पूजयामि' पढ़ कर पूजन करे। पुनः भीतर त्रिकोण के सम्मुख 'ॐ उग्राश्रीपादुकां पूजयामि' तथा बाँयें 'ॐ उग्रप्रभाश्रीपादुकां पूजयामि' तथा दाहिने 'ॐ दीप्ताश्रीपादुकां पूजयामि' पढ़ कर पाद्य आदि से पूजन करे।

सम्मुखे 'ॐ मात्राश्रीपादुकां पूजयामि' इत्यादि। वामे 'ॐ मुद्राश्रीपादुकां पूजयामि' इत्यादि। दक्षे 'ॐ मित्राश्रीपादुकां पूजयामि' इत्यादि। पूर्वोक्तवाक्यैः पाद्यादिभिः पूजयेत्।

ततो देव्या दक्षे 'हसौं महाकालाय हूं फट्' इति मन्त्रेण महाकालं पूजयेत्। कुलार्णवे तु–'ॐ ह्रीं क्ष्मीं हूं महाकालाय ह्रौं महादेवाय क्रीं कालिकायै ह्रौं' इति महाकालमन्त्रः तद्ध्यानं तु—

'अञ्जनाद्रिनिभं देवं पिङ्गकेशं द्विबाहुकम्।
आशाम्बरं सर्पभूषाभूषितं प्रणमामि तम्॥

इति ध्यात्वा, पूर्वोक्तमन्त्रद्वयान्तरेण महाकालं पूजयेत्। ततः—'ॐ अभीष्टसिद्धिं मे देहि शरणागतपालिके।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम्॥'

इति मन्त्रेण शङ्खोदकादिना देव्या वामहस्ते आवरणार्चनं समर्पयेत्।

पुनः उसके भीतर त्रिकोण के सम्मुख ॐ नीलाश्रीपादुकां पूजयामि', फिर उसके बाँयें 'ॐ घनाश्रीपादुकां पूजयामि' तथा इसके भीतर के त्रिकोण के सम्मुख 'ॐ मात्राश्रीपादुकां पूजयामि', बाँयें 'मुद्राश्रीपादुकां पूजयामि' एवं दाहिने 'ॐ मित्राश्रीपादुकां पूजयामि' इत्यादि वाक्य पढ़ कर तत्तद्देवियों का पाद्य आदि से पूजन करे।

देवी की दाहिनी ओर 'हसौं महाकालाय हूं फट्' इस मन्त्र से महाकाल का पूजन करना चाहिए। कुलार्णव में—'ॐ ह्रीं क्ष्मीं' से लेकर 'कालिकायै ह्रौं' पर्यन्त महाकाल का मन्त्र कहा गया है। और उनका ध्यान-'अञ्जनाद्रिनिभं' से 'प्रणमामि तम्' पर्यन्त

ततोऽष्टदले पूर्वादिक्रमेणाऽष्टशक्तीः पूजयेत् । तद्यथा-पूर्वे 'ॐ आंब्रह्माणीश्रीपादुकां पूजयामि नमः' इत्यदिवाक्येन पाद्यादिभिस्त्रिः सम्पूजयेत् । अग्निकोणे 'ॐ ईंश्रीनारायणीश्रीपादुकां पूजयामि' इत्यादि । दक्षिणे 'ॐ ऊंमाहेश्वरीश्रीपादुकां पूजयामि' इत्यादि । नैर्ऋते 'ॐ ऋंश्रीचामुण्डाश्रीपादुकां पूजयामि' इत्यादि । पश्चिमे 'ॐ लृंकौमारीश्रीपादुकां पूजयामि' इत्यादि । वायव्ये 'ॐ एंअपराजिताश्रीपादुकां पूजयामि' इत्यादि । उत्तरे 'ॐ औंवाराहीश्रीपादुकां पूजयामि'

श्लोक से, उनका ध्यान कर पूर्वोक्त मन्त्रों में किसी एक मन्त्र से महाकाल का पूजन करे। और 'अभीष्टसिद्धि' से लेकर 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़ते हुए शङ्ख के जल से देवी के बाँयें हाथ में इस आवरणार्चन को समर्पित करे।

पुनः त्रिकोण के अष्टदल में पूर्वादि क्रम से आठ शक्तियों की पूजा करनी चाहिए। वह इस प्रकार है—सर्वप्रथम पूर्व दिशा में 'ॐ आं ब्रह्माणीश्रीपादुकां पूजयामि नमः' इत्यादि वाक्य पढ़ कर तीन बार ब्रह्माणी का पाद्यादि से अर्चन करे। इसी प्रकार अग्निकोण में 'ॐ इंश्रीनारायणीश्रीपादुकां पूजयामि नमः' से नारायणी की, दक्षिण में माहेश्वरी की, नैर्ऋत्य में श्रीचामुण्डा की, पश्चिम में कौमारी की, वायव्य में अपराजिता, उत्तर में वाराही की,

इत्यादि । ईशाने 'ॐ अःनारसिंहीश्रीपादुकां पूजयामि' इत्यादि । आसां ध्यानं तु पूजनतः पूर्वमेव कर्त्तव्यम् । तद्यथा–

'दण्डं कमण्डलुं पश्चादक्षसूत्रं महाभयम् ।
बिभ्रती कनकच्छायां ब्राह्मी कृष्णाजिनोज्ज्वला ॥ १ ॥
शूलं परश्वधं क्षुद्रं दुन्दुभीनृकरोटिकाम् ।
वहन्ती हिमसङ्काशा ध्येया माहेश्वरी शुभा ॥ २ ॥
अङ्कुशं दण्डखट्वाङ्गौ पाशं च दधती करैः ।
बन्धूकपुष्पसङ्काशा कुमारी कामदायिनी ॥ ३ ॥
चक्रं घण्टां कपालं च शङ्खं च दधती करैः ।
तमाल-श्यामला ध्येया वैष्णवी विभ्रमोज्ज्वला ॥ ४ ॥
मुशलं करवालं च खटकं दधती हलम् ।
करैश्चतुर्भिर्वाराही ध्येया कालघनच्छविः ॥ ५ ॥
अङ्कुशं तोमरं विद्युत् कुलिशं बिभ्रती करैः ।
इन्द्रनीलनिभेन्द्राणी ध्येया सर्वसमृद्धिदा ॥ ६ ॥

ईशान में नारसिंही की, मूल में निर्दिष्ट तत्तन्मन्त्रों से तीन बार पूजन करे, किन्तु इनके पूजन के पूर्व इन आठ महादेवियों का ध्यान अवश्य करना चाहिए। ध्यान का मन्त्र इस प्रकार है—'दण्डं' से 'कृष्णाजिनोज्ज्वला' पर्यन्त पूर्व में ब्राह्मी का १, 'शूलं परश्वधं' से 'माहेश्वरी शुभा' पर्यन्त पढ़कर माहेश्वरी का २, अङ्कुशं से 'काम-दायिनी' तक कौमारी का ३, 'चक्रं से 'विभ्रमोज्ज्वला' पर्यन्त पढ़ कर वैष्णवी का ४, 'मुशलं' से 'घनच्छविः' पर्यन्त पढ़ कर वाराही का ५, 'अङ्कुशं तोमरं' से 'सर्वसमृद्धिदा' पर्यन्त पढ़कर इन्द्राणी का ६,

शूलं कृपाणं नृशिरः कपालं दधती करैः ।
मुण्डस्त्र मण्डिता ध्येया चामुण्डा रक्तवि ग्रहा ॥ ७ ॥
अक्षस्रजं बीजपरं कपालं दधती करैः ।
वहन्ती हेमसङ्काशा मोहलक्ष्मीः समीरिता' ॥४॥ इति।

ततः—'अभीष्टसिद्धि मे देहि शरणागतपालिके ।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥'

इति मूलं च पठन्, पुष्प-चन्दनयुत-शङ्खोदकेन देव्या वामहस्तेन समर्पयेत् ।

ततः यन्त्राग्रे भैरवान् पूजयेत् । तत्र प्रथमं ध्यानं कुर्यात् । तद्यथा—

'भीषणास्यं त्रिनयनमर्द्धचन्द्रविभूषितम् ।
स्फटिकाभं कङ्कणादिभूषाशतसमायुतम् ॥ १ ॥
अष्टवर्षवयस्कं च कुन्तलोल्लसितं भजे ।
धारयन्तं दण्डशूले भैरव्यादिसमायुतम्' ॥२॥

शूलं कृपाणं' से रक्तविग्रहा' पर्यन्त मन्त्र पढ़कर चामुण्डा का ७, तथा 'अक्षस्रजं से 'समीरिता' पर्यन्त मन्त्र पढ़ कर महालक्ष्मी ८ का ध्यान करना चाहिए ।

पूर्व में इन आठ देवियों का जो आठ दिशाओं में पूजा का क्रम बताया गया है ध्यान के मन्त्रों में क्रम का विपर्यय हो गया है। साधक पूजा के क्रमानुसार ध्यान करें। इस प्रकार आठ महाशक्तियों का पूजन कर 'अभीष्टसिद्धि' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़कर शङ्ख में स्थापित पुष्प, चन्दन युक्त जल को देवी के लिए निवेदित कर उनके बाँयें हाथ में द्वितीय आवरणार्चन प्रदान करे। फिर यन्त्र के अग्रभाग में आठ महाभैरवों का पूजन करे।

सर्व-प्रथम 'भीषणास्यं' से 'भैरव्यादिसमायुतम्' पर्यन्त दो श्लोक

इति ध्यात्वा पूजयेत् । पूजाक्रमस्तु—

'एँ ह्रीं अं असिताङ्गभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं इं रुरुभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं उं चण्डभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं ऋं क्रोधभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं लृं उन्मत्तभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं एं कपालिभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं ओं भीषणभैरवश्रीपादुकां पूजयामि नमः ।
एँ ह्रीं अं संहारभैरवश्रीपादुकां पूजयामि नमः ।

इति वामावर्त्तेन पूजयेत्—

तत्रैव पूर्वादितो वामावर्त्तेनाऽष्टभैरवीः प्रत्येकं तत्तन्नामाक्षरैस्तास्ताः पूजयेत् । तत्रासां ध्यानं तु—

पढ़ कर भैरवों का ध्यान करे, फिर पूर्वादि क्रम से ईशान पर्यन्त आठों दिशाओं में 'एं ह्रीं अं असिताङ्गभैरवश्रीपादुकां पूजयामि' से लेकर ऐं ह्रीं अं संहारभैरवश्रीपादुकां पूजयामि' पर्यन्त आठ मन्त्रों को पढ़ कर वामावर्त्त से क्रमशः पूर्व में असिताङ्ग भैरव, आग्नेय में रुरुभैरव, दक्षिण में चण्ड भैरव, नैर्ऋत्य में क्रोध भैरव, पश्चिम में उन्मत्त भैरव, वायव्य में कपालि भैरव, उत्तर में भीषण भैरव तथा ईशान में संहार भैरव का तत्तन्मन्त्रों से पूजन करे ।

इसी प्रकार वामावर्त्त से पूर्वादि दिशा से ईशान पर्यन्त तत्तद् भैरवियों के नाम मन्त्र से आठ भैरवियों का भी पूजन करे । सर्व-

'भावये च महादेवीं चन्द्रकोटियुतप्रभाम् ।
हिमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥ १ ॥
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम् ।
प्रहसन्तीं विशालाक्षीं देवदेवस्त्र सम्मुखीम्' ॥ २ ॥

इति ध्यात्वा पूजयेत् । यथा—'श्रीभैरवीश्रीपादुकां पूजयामि नमः । महाभैरवीश्रीपादुकां पूजयामि नमः । सिंहभैरवीश्रीपादुकां पूजयामि नमः । धूम्रभैरवीश्रीपादुकां पूजयामि नमः । भीमभैरवीश्रीपादुकां पूजयामि नमः । उन्मत्तभैरवीश्रीपादुकां पूजयामि नमः । वशीकरणभैरवीश्रीपादुकां पूजयामि नमः । मोहनभैरवीश्रीपादुकां पूजयामि नमः ।

ततः—'ॐ अभीष्टसिद्धिं मे देहि शरणागतपालिके ।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥'

इति मन्त्रेण देव्या वामहस्ते आवरणार्चनं समर्पयेत् । ततो यन्त्रबाह्ये इन्द्रादीन् पूजयेत् । तेषां ध्यानं यथा—'इन्द्रं नीलवर्णमैरावतवाहनं वज्रहस्तं मुकुटधारिणं सहस्राक्षं ध्या-

---

प्रथम 'भावये च' से 'सम्मुखीम्' पर्यन्त दो मन्त्रों को पढ़ते हुए ध्यान करे । पुनः पूर्वादि से ईशान पर्यन्त 'श्रीभैरवीश्रीपादुकां पूजयामि' से लेकर 'मोहनभैरवीश्रीपादुकां पूजयामि' पर्यन्त आठ मन्त्रों को पढ़ कर पूर्व में श्री भैरवी, आग्नेय में महाभैरवी, वायव्य में उन्मत्त भैरवी, उत्तर में वशीकरण भैरवी, तथा ईशान कोण में मोहनभैरवी का तत्तन्मन्त्रों द्वारा पूजन करे ।

तदन्तर 'ॐ अभीष्टसिद्धि मे देहि' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़ कर देवी के वामहस्त में तृतीय आवरण पूजा समर्पित करे । और यन्त्र के बाहर इन्द्रादिकों का पूजन करे । सर्व-प्रथम पूर्व में 'इन्द्रं नीलवर्णं' से 'सहस्राक्षं ध्यायेत्' पर्यन्त पढ़ कर इन्द्र

येत् । वह्निं रक्तवर्णं शक्तिहस्तं त्रिनेत्रं मेषवाहनं ध्यायेत् । यमं महिषवाहनं दण्डपाशधरं श्यामं ध्यायेत् । निर्ऋतिं श्यामवर्णं खड्गहस्तमृतपुरुषवाहनं ध्यायेत् । वरुणं पाशहस्तं मकरवाहनं शुद्धवर्णं ध्यायेत् । वायुमङ्कुशहस्तं मृगवाहनं नीलवर्णं ध्यायेत् । कुबेरं गदाहस्तं मत्स्यवाहनं श्यामवर्णं ध्यायेत् । ईशानं शूलहस्तं वृषभवाहनं त्रिनेत्रं गौरवर्णं ध्यायेत् ।

हंसमारूढं स्वर्णं च चतुर्वक्त्रं दण्डत्रयाक्षसूत्रं कमण्डलुं दधतं जटाजूटधरं ब्रह्माणं ध्यायेत् । श्यामं गरुडवाहनं शङ्खचक्रगदापद्मधारिणं चतुर्हस्तं नानालङ्कारसंयुक्तं विष्णुं ध्यायेत् । इति ध्यात्वा, 'इन्द्रादय इहागच्छत इह तिष्ठत' इत्यावाह्य । पूर्वादितो वामावर्त्तेन पूजयेत् । तद्यथा–'लं इन्द्रश्रीपादुकां पूजयामि नमः । रं वह्निश्रीपादुकां पूजयामि नमः । यं

का, आग्नेय में 'वह्निं रक्तवर्णं' से 'मेषवाहनं ध्यायेत्' से अग्नि का दक्षिण में 'यमं महिषवाहणं से 'श्यामं ध्यायेत्' पर्यन्त पढ़ कर यम का, फिर नैर्ऋत्य में 'श्यामवर्णं' से, पुरुषवाहनं ध्यायेत्' पर्यन्त पढ़ कर निर्ऋति का, पश्चिम में, वरुणं पाशहस्तं' से 'शुद्धवर्णं ध्यायेत्' पढ़ कर वरुण का तथा वायव्य में 'वायुमङ्कुशहस्तं' से 'नीलवर्णं ध्यायेत्' पढ़ कर वायु का, उत्तर में 'कुबेरं' से 'श्यामवर्णं ध्यायेत्' पर्यन्त पढ़ कर कुबेर का, एवं ईशान में 'ईशानं' से 'गौरवर्णं ध्यायेत्' पर्यन्त पढ़ कर ईशान का ध्यान करे ।

इसी प्रकार ऊपर 'हंसमारूढं' से 'ब्रह्माणं ध्यायेत्' पर्यन्त वाक्य बोल कर ब्रह्मा का तथा नीचे 'श्यामं' से 'विष्णुं ध्यायेत्' पर्यन्त मन्त्र पढ़कर विष्णु का ध्यान कर 'इन्द्रादय इहागच्छत इह तिष्ठत' पर्यन्त वाक्य पढ़ कर इन्द्रादि दश दिक्पालों का आवाहन कर पूर्वादि

यमश्रीपादुकां पूजयामि नमः । क्षं निर्ऋतिश्रीपादुकां पूजयामि नमः । वं वरुणश्रीपादुकां पूजयामि नमः । यं वायुश्रीपादुकां पूजयामि नमः । इं कुबेरश्रीपादुकां पूजयामि नमः । हों ईशानश्रीपादुकां पूजयामि नमः । ह्रीं ब्रह्मश्रीपादुकां पूजयामि नमः । ततः–'ॐ विष्णुश्रीपादुकां पूजयामि नमः ।'

'अभीष्टसिद्धिं मे देहि शरणागतपालिके ।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥

इति मन्त्रेण देव्या वामहस्ते आवरणार्चनं समर्पयेत् ।

ततो वामावर्त्तेन तत्तत्स्थले अस्त्राणि पूजयेत् । यथा–वं वज्रश्रीपादुकां पूजयामि नमः । शं शक्तिश्रीपादुकां पूजयामि नमः । दं दण्डश्रीपादुकां पूजयामि नमः । खं खड्गश्रीपादुकां पूजयामि नमः । पं पाशश्रीपादुकां पूजयामि नमः । अं अङ्कुशश्रीपादुकां पूजयामि नमः । गं गदाश्रीपादुकां पूजयामि नमः । शं शूलश्रीपादुकां पूजयामि नमः । पं पद्म-

---

क्रम से वामावर्त्त 'लं इन्द्रश्रीपादुकां पूजयामि' से 'ॐ विष्णुश्रीपादुकां पूजयामि नमः' पर्यन्त दश मन्त्र पढ़ कर दश दिक्पालों का पूजन करे।

तदनन्तर 'अभीष्टसिद्धिं मे देहि' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़ कर देवी के वाम हस्त में चतुर्थ आवरण पूजा का निवेदन करे। पुनः उसी प्रकार वामावर्त्त से पूर्वादि से ईशान पर्यन्त तत्तद्दिशाओं में अस्त्रों का 'वं वज्रश्रीपादुकां' से लेकर 'चं चक्रश्रीपादुकां पूजयामि नमः' पर्यन्त दश मन्त्रों को पढ़ कर कम से कम पूर्वादि से ईशान पर्यन्त आठ दिशाओं में तथा अन्तिम के दो मन्त्रों से ऊपर

श्रीपादुकां पूजयामि नमः । चं चक्रश्रीपादुकां पूजयामि नमः । ततः—'अभीष्टसिद्धिं मे देहि शरणागतपालिके ।

भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥'

इति मन्त्रेण देव्या वामकरे आवरणार्चनं समर्पयेत् ।

ततः देव्या वामोर्ध्वहस्ते खं खड्गश्रीपादुकां पूजयामि नमः । तदधः—'मं मुण्डश्रीपादुकां पूजयामि नमः । दक्षोद्र्ध्वे अं अभयश्रीपादुकां पूजयामि नमः । तदधः—वं वरश्रीपादुकां पूजयामि नमः ।

'ॐ अभीष्टसिद्धिं मे देहि शरणागतपालिके ।

भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥'

इति मन्त्रेण आवरणार्चनं देव्या वामकरे समर्पयेत् ।

और नीचे वज्रादि से लेकर चक्र पर्यन्त दश अस्त्रों का पूजन करे। तत्पश्चात्' 'अभीष्टसिद्धि' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़ कर भगवती के बाँयें हाथ में आवरणार्चनम्' समर्पित करे।

तदनन्तर देवी के बाँयें, उपर वाले हाथ में 'खं खड्गश्रीपादुकां 'पूजयामि नमः' मन्त्र से खड्ग का तथा बाँयीं ओर के नीचे भाग में मं मुण्डश्रीपादुकां पूजयामि नमः' पढ़कर मुण्ड का। इसी प्रकार दाहिनी ओर के ऊपर वाले हाथ में 'अं अभयश्रीपादुकां पूजयामि नमः' से अभय मुद्रा का तथा दाहिनी ओर के नीचे वाले हाथ में 'वं वरश्रीपादुकां पूजयामि' पढ़कर वर मुद्रा का पूजन कर 'ॐ 'अभीष्टसिद्धि में' से 'आवरणार्चनम्' पर्यन्त मन्त्र पढ़कर देवी के वाम हस्त में आवरणार्चन को समर्पित करे।

पुष्पाञ्जलित्रयं देव्याः पादयोर्दद्यात् ।

ततः षडङ्गन्यासं पूर्वोक्तं कुर्यात् । तद्यथा – क्रां हृदयाय नमः क्रीं शिरसे स्वाहा । क्रूं शिखायै वषट् । क्रैं कवचाय हुम् । क्रौं नेत्रत्रयाय वौषट् । क्रः अस्त्राय फट् ।

एवं न्यासं विधाय, गन्ध-पुष्पाक्षतैर्देवीं सम्पूज्य, मूलं पठन् श्रीमद्दक्षिणकालीं देवीं तर्पयामि नमः' इति मन्त्रेण मधुकर्पूरमिश्रितैर्जलैर्द्वादशधा तर्पयेत् । ततो घण्टां वादयंस्ततो जपं कुर्यात् ।

जपविधिः

ततः पूर्वोक्तक्रमेण प्राणायामं षडङ्गन्यासं च विदध्यात् । तद्यथा – क्रीं बीजेन १६ षोडशधापूरक, ६४ चतुष्षष्टिकुम्भक, ३२ द्वात्रिंशद्रेचकैस्त्रिवारं प्राणानायम्य, ततो न्यासः – 'क्रां

उसके बाद तीन पुष्पांजलि देवी के श्रीचरणों में समर्पित करे । तथा पूर्वोक्त कही हुई विधि से 'क्रां हृदयाय नमः' से 'क्रः अस्त्राय फट्' पर्यन्त मन्त्र पढ़कर हृदयादि षडङ्गन्यास करे ।

इस प्रकार षडङ्गन्यास कर गन्ध, पुष्प, अक्षतादि द्रव्यों से देवी की पूजा कर मूल मन्त्र के सहित 'श्रीमद्दक्षिणकालीं देवीं तर्पयामि नमः' मन्त्र पढ़कर मधु एवं कपूर मिले हुए जल से दश बार श्री भगवती का तर्पण करे । पुनः घण्टा बजा कर देवी मन्त्र का जप प्रारम्भ करे ।

जप प्रारम्भ से पहले पूर्वोक्त विधि से प्राणायाम एवं षडङ्गन्यास करना चाहिए । जिसकी विधि इस प्रकार है–'क्रीं बीज को सोलह बार पढ़कर पूरक, चौंसठ बार पढ़कर कुम्भक, और बत्तीस बार

हृदयाय नमः क्रींशिरसे स्वाहा, क्रूंशिखायै वषट्, क्रैंकवचाय हुम्, क्रौंनेत्रत्रयाय वौषट्, क्रःअस्त्राय फट् ।'

ततः—'ॐ माले माले महामाले सर्वतरवस्वरूपिणी ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥'

'ॐ ह्रीं मालायै नमः' इत्यनेन मालां दक्षिणकरे निधाय, हृत्प्रदेशे समानीय, मध्यभागेन गुटिकां प्रत्येकं संस्पृशन् मेरुमङ्घयन् स्वशरीरे कामकलां विभाव्य, शिरसि गुरुं ध्यात्वा, हृदि देवीं भावयन् जिह्वायां मन्त्रं दीपरूपिणं विभाव्य तत्प्रभापटले जिह्वामपि दीपरूपां विभाव्य, मनसा उपांशुना वा, करमालया वर्णमालया वा, संस्कृतमहाशङ्ख-रुद्राक्ष-स्फटिकाद्यन्यतममालया वा, अष्टोत्तरसहस्रमष्टोत्तरशतं वा द्रुतम्, विलम्बितं प्रजप्य, मालां सिरसि ।

पढ़कर रेचक करना चाहिए। पश्चात् 'क्रां हृदयाय नमः' से 'क्रः अस्त्राय फट्' पर्यन्त मन्त्र पढ़कर हृदयादि न्यास करे।

पुनः 'ॐ माले माले' से 'ॐ ह्रीं मालायै नमः' पर्यन्त मन्त्र पढ़कर माला को दाहिने हाथ में लेवे और हृदयस्थान पर ले आकर मध्यभाग से प्रत्येक मन्त्र द्वारा माला के एक-एक दाने को स्पर्श करते हुए सुमेरु कार्ष लङ्घन न कर अपने शरीर को कामकला की भावना करते हुए, शीर्ष स्थान में गुरु का ध्यान कर हृदय में देवी का स्मरण करते हुए जिह्वा पर मन्त्र रूपी दीप की कल्पना कर जिह्वा को भी दीप रूप में समझते हुए, मानस उपांशु रूप जप, करमाला से, वर्णमाला से अथवा अत्यन्त सुसंस्कृत महाशङ्ख, रुद्राक्ष अथवा स्फटिक निर्मित माला में किसी एक माला से एक हजार आठ अथवा एक सौ आठ बार सामान्य प्रकार से, उसमें न तो जल्दीबाजी हो, न विलम्ब हो; देवी के मन्त्र का जप करे। जप करने के बाद 'ॐ त्वं माले' से

'ॐ त्वं माले सर्वभूतानां सर्वलोकप्रिया मता ।
शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥'

इति पठन् निधाय, 'ह्रीं सिद्धयै नमः' इति सम्पूज्य ।

पुनः प्राणायामं न्यासादिकं च विधाय, यथा क्रीं बीजेन १६ पूरक, ६४ कुम्भक, ३२ रेचकैस्त्रिवारं प्राणानायम्य ।

ततो न्यासः—'क्रां हृदयाय नमः, क्रीं शिरसे स्वाहा । क्रूं शिखायै वषट् । क्रैं कवचाय हूम् । क्रौं नेत्रत्रयाय वौषट्, क्रः अस्त्राय फट्, इति न्यासादिकं कुर्यात् ।

ततो देवतां पुष्पाक्षतादिभिः सम्पूज्य, पुष्प-चन्दनाऽक्षत-युतशङ्खोदकेन—

'ॐ गुह्यातिगुह्य-गोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् महेश्वरि ! ॥'

इति मन्त्रेण देव्या वामकरे तेजोमयं जलं ध्यात्वा, जपं समर्पयेत् ।

'सर्वदा' पर्यन्त मन्त्र पढ़ते हुए माला को शिर पर रखे । पुनः 'ह्रीं सिद्धयै नमः' मन्त्र से उसका पूजन करे ।

पुनः पूर्वोक्त रीति से प्राणायाम एवं न्यास करे । विधि इस प्रकार है—'क्रीं' बीज का सोलह बार जप करते हुए पूरक, चौंसठ बार जप करते हुए कुम्भक, बत्तीस बार जप करते हुए रेचक प्राणायाम कर 'क्रां हृदयाय नमः' से 'क्रः अस्त्राय फट्' पर्यन्त मन्त्र पढ़कर हृदयादि न्यास करे ।

गन्ध, पुष्पाक्षतादि से देवी का पूजन कर पुष्प, चन्दन, अक्षत से युक्त शङ्खोदक से 'ॐ गुह्यातिगुह्य' से 'महेश्वरि' पर्यन्त मन्त्र पढ़कर तेजोमय देवी का ध्यान करते हुए उनके बायें हाथ में जप समर्पित करे ।

ततो मालां सिरस उत्तार्य,

'ॐ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता।

तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ॥'

इत्यमुं मन्त्रं पठन् सम्पूज्य, यत्नतो गोपयेत्। ततो देव्यै पुष्पाञ्जल्यष्टकं दत्त्वा, स्तोत्र-कवचादिकं पठेत्।

कराद् भ्रंशेत्तच्छान्त्यर्थमष्टोत्तरशत मूलं जपेत्।

ततो वामे चतुरस्रं मण्डलं विधाय, किञ्चित् पात्रे संस्थाप्य, तस्मिन् मांस-माषान्न-शाका-ऽऽज्य-पायसा-ऽपूपकाद्यन्यतमबलिं विधाय, 'फट्' इति सम्प्रोक्ष्य, 'नमः' इत्यभ्यर्च्य, 'यम्' इति वायुबीजेन द्वादशवारजप्तेन संशोष्य, वामहस्ततले दक्षहस्तपृष्ठं निवेश्य, 'रम्' इति वह्निबीजेन षोडशवारजप्तेन

तत्पश्चात् माला को शिर से उतार कर, 'ॐ त्वं माले सर्वदेवानां' से 'मातर्नमोऽस्तु ते' पर्यन्त मन्त्र पढ़कर माला का पूजन करे तथा यत्न से उसे गुप्त रखे। पुनः देवी को आठ बार पुष्पाञ्जलि समर्पित कर देवी के स्तोत्र एवं कवचादि का पाठ करे।

यदि माला हाथ से गिर जाय, तो एक सौ आठ बार मूलमन्त्र का जप कर उसका प्रायश्चित्त करे।

तदनन्तर बाँयीं ओर चौकोर, समतल मण्डल का निर्माण कर उस मण्डल पर किसी पात्र में मांस, ऊर्द, शाक, आज्य, पायस, अपूप आदि में से कोई भी बलि वस्तु रखकर, मण्डल, में उसे स्थापित करे। 'फट्' इस मन्त्र से उसका प्रोक्षण कर 'नमः' मन्त्र पढ़कर अर्चना करे। 'यम्' इस वायु बीज को बारह बार पढ़कर उसका शोषण करे। पश्चात् बाँयें हाथ के तलवे पर दाहिने हाथ के पृष्ठ तल को रखकर 'रम्' इस अग्नि बीज के मन्त्र को सोलह बार जप कर, उसके दोषों को जला दे, फिर 'वम्' इस अमृत बीज मन्त्र को बीस बार जप कर,

संदीप्य, 'वम्' इत्यमृतबीजेन विंशतिवारजप्तेन धेनुमुद्रयाऽमृतीकृत्य, 'हुम्' इत्यवगुण्ठ्य, योनिधेनुमुद्रे दर्शयित्वा, तत्त्वमुद्रां च प्रदर्श्य,

'ॐ क्रींश्रींदक्षिणकालिकायै स्वाहा एष बलिर्नमः' इत्युत्सृज्य, नैऋत्यां दिशि धारयेत् । एष नित्यबलिदानमन्त्रः ।

रात्रौ काम्यबलिर्देयः । तत्र मन्त्रस्तु—

'ॐ पद्मे पद्मे महापद्मे पद्मावति महायक्षाधिपतये मयोपनीतमिमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय मम सर्वशान्तिं कुरु कुरु परविद्यां चाकृष्याकृष्य छिन्धि ह्रीं हूं स्वाहा' इति मन्त्रेण चतुष्पथादिस्थाने पूर्वोक्तशोधनं विधाय, तत्त्वमुद्रां प्रदर्श्य, मांसाद्यन्यतमबलिं दद्यात् । अधिकभक्त्युत्तरशक्तिकालादिलाभे चतुर्थ्यन्तैः प्रत्येकैः सहस्रनामस्तोत्रान्तर्गतनामभिः (सहस्रनामावलीभिः) पुष्पादिना कालीं पूजयेत् ।

उसे धेनु मुद्रा दिखा अमृतीकरण करे । फिर 'हुम्' इस मन्त्र से उस पात्र को घेर कर योनि मुद्रा तथा धेनु मुद्रा दिखा तत्त्व मुद्रा प्रदर्शित करे ।

तदनन्तर 'ॐ क्रीं श्रीं दक्षिणकालिकायै स्वाहा एष बलिर्नमः' मन्त्र पढ़ बलिदान देकर नैऋत्य कोण में बलि पात्र को स्थापित करे । यह नित्य का बलिदान मन्त्र है । यदि काम्य कर्म हो, तो रात्रि में 'ॐ पद्मे पद्मे महापद्मे 'से' ह्रीं हूं स्वाहा' पर्यन्त मन्त्र पढ़कर चतुष्पथ (चौराहे) पर, उस स्थान को पूर्वोक्त रीति से शुद्ध कर तत्त्व मुद्रा प्रदर्शित कर मांस आदि किसी भी वस्तु की बलि देवे । अधिक भक्ति अधिक शक्ति तथा अधिक काल होने पर पुष्पादि द्वारा श्री महाभगवती के सहस्र नाम के प्रत्येक नाम के अन्त में चतुर्थी विभक्ति (काली सहस्रनामावली) लगाकर श्री भगवती काली को पुष्पादि समर्पित करना चाहिए ।

कुमारीसुवासिनीपूजाविधिः

कुमारीं सुवासिनीं च पूजयेद् भोजयेच्च। तत्क्रमो यथा—पूजागृहे कुमारीमानीय, प्रदक्षिणीकृत्योद्वर्त्तनाद्यैः स्नापयित्वा, गन्धतैलेन शरीरं संस्कुर्यात्। केशं परिष्कृत्य, ललाते सिन्दूरम्, नयनयोः कज्जलम्, सर्वाङ्गे चन्दनम्, वस्त्रालङ्कारैराभूष्य, पादौ प्रक्षाल्य, पीठोपरि समावेश्य, ताम्बूलेन मुखं संशोध्य, स्वयमपि न्यासं कृत्वा, षडङ्गेषु न्यसेत्। 'ॐ क्लां कुलकुमारिके हृदयाय नमः। क्लीं कुलकुमारिके शिरसि स्वाहा। ॐ क्लूं कुलकुमारिके शिखायै वषट्। ॐ क्लैं कुलकुमारिके कवचाय हुम्। ॐ क्लौं कुलकुमारिके नेत्रत्रयाय वौषट्। ॐ क्लः कुलकुमारिके अस्त्राय फट्।'

ततोऽङ्गेषु मातृकान्यासाः। स च यथा—'अं नमो ललाटे। आं नमो मुखवृत्ते। इं नमो दक्षनेत्रे। ईं नमो वामनेत्रे। उं नमो

सहस्र नामावली द्वारा पुष्प समर्पण के अनन्तर कुमारियों तथा सुवासिनियों को भोजन करावे ('सद्यः परिणीता अथवा परिणयानन्तरं पतिगृहादागता वधूः, सुवासिनी' कही जाती है)। पूजागृह में कुमारियों को बुला कर उबटन आदि का लेप कर उन्हें स्नान करावे। इत्रादि सुगन्धित पदार्थ लगा कर उनके शरीर का संस्कार करे। केश का परिष्कार करे, मस्तक में सिन्दूर तथा नेत्रों में कज्जल लगा कर उनके सर्वाङ्ग में चन्दन का लेप करे। वस्त्र एवं अलङ्कारों से भूषित करे। उनका चरण प्रक्षालन कर उत्तम आसन पर बिठावे। ताम्बूल के द्वारा उनका मुख शुद्ध कर स्वयं न्यास कर उनके अङ्गों में 'ॐ क्लां कुलकुमारिके हृदयाय नमः' से 'ॐ क्लः कुलकमारिके अस्त्राय फट्' पर्यन्त मन्त्र पढ़कर षडङ्गन्यास करे।

दक्षकर्णे। ऊँ नमो वामकर्णे। ऋं नमो दक्षनासायाम्। ॠं नमो वामनासायाम्। लृं नमो दक्षगण्डे। ॡं नमो वामगण्डे। एं नमः ऊर्ध्वोष्ठे। ऐं नमः अधरोष्ठे। ओं नमः ऊर्ध्वदन्तपङ्क्तौ। औं नमः अधोदन्तपङ्क्तौ। अं नमः शिरसि। अः नमो मुखे।' ततो ध्यायेत् –

'शङ्खकुन्देन्दुधवलां द्विभुजां वरदाभयाम्।
चन्द्रमध्यमहां मोज-भावहाव-विराजिताम्॥'

एवं ध्यात्वा, मानसोपचारैः सम्पूज्य, पुनर्ध्यात्वा, पूजयेत्। यथा 'इदं पाद्यं ह्रीं कुलकुमारिकायै नमः' एवम् 'इदमर्घमिदमाचमनीयमिदमनुलेपनमेतेऽक्षताः एतानि पुष्पाणि एष धूपः एष दीपः इदं नैवेद्यमिदं ताम्बूलं ह्रींकुलकुमारिकायै नमः' इति मन्त्रेण पूजयेत्। अतः षडङ्गमन्त्रेण षडङ्गानि पूजयेत्। तद्यथा –'ॐ क्लां कुलकुमारिके हृदयाय नमः। ॐ क्लीं कुलकुमारिके शिरसे नमः। ॐ क्लूं कुलकुमारिके शिखायै नमः। ॐ क्लैं कुलकुमारिके कवचाय नमः। ॐ क्लौं

पुनः उनके अङ्गों में 'ॐ अं नमो ललाटे' से 'अः नमो मुखे' पर्यन्त मन्त्र पढ़कर तत्तदङ्गों का स्पर्श करते हुए मातृका न्यास करे।

उसके बाद 'शङ्खकुन्देन्दुधवलां' से 'विराजितां' पर्यन्त मन्त्र पढ़कर कुमारी का ध्यान कर मानसोपचार से पूजन करे। पुनः ध्यान कर 'इदं पाद्यं ह्रीं कुलकमारिकायै नमः' से 'ताम्बूलं ह्रीं कुलकुमारिकायै नमः' पर्यन्त मन्त्र पढ़कर पाद्य, अर्घ्य, आचमनीय, अनुलेपन, अक्षत, पुष्प, धूप, दीप, नैवेद्य एवं ताम्बूल से पूजन करे। तदनन्तर 'ॐ क्लां कुलकुमारिके हृदयाय नमः' से 'ॐ क्लः कुल-

कुलकुमारिके नेत्रत्रयाय नमः। ॐ क्लः कुलकुमारिके अस्त्राय नमः' इत्यङ्गानि पूजयित्वा प्रार्थयेत्। तत्र मन्त्रो यथा—

ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणी।
पूजां गृहाण कौमारि! जगन्मातर्नमोऽस्तु ते ॥ १ ॥
त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम्।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ २ ॥
कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम्।
कारुण्यजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥ ३ ॥
अणिमादिगुणोपेतामकारादि-स्वरात्मिकाम् ।
शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ४ ॥
कलाधरां कलारूपां कालचण्डस्वरूपिणीम्।
कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥ ५ ॥
चण्डधारां चण्डमायां चण्डमुण्डविनाशिनीम्।
प्रणमामि च देवेशीं चण्डिकां पूजयाम्यहम् ॥ ६ ॥
सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्।
सर्वभूतात्मिकां देवीं शङ्करीं पूजयाम्यहम् ॥ ७ ॥
दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम्।
पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥ ८ ॥

कुमारिके अस्त्राय नमः' पर्यन्त मन्त्रों को पढ़ते हुए हृदयादि षडङ्ग-न्यासपूर्वक अङ्गों का तीन बार पूजन कर 'ॐ जगत्पूज्ये' से 'सुभद्रां प्रणमाम्यहम्' पर्यन्त नव मन्त्रों को पढ़कर क्रमशः प्रत्येक

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम्' ॥ ९ ॥

(कौमारी, त्रिपुरा, कल्याणी, रोहिणी, कामिनी, चण्डिका, शङ्करी, दुर्गा, सुभद्रा—इति कुमारीनामानि)

ततः कर्पूरादिवर्त्तिकारचिताऽऽरार्तिकं दत्त्वा, दक्षिणां च दत्त्वा, प्रणम्य, विसर्जयेत् ।

'ॐ ह्रीं हंसः कुलकुमारिकाश्रीपादुकां पूजयामि' इति पुष्पाञ्जलित्रयं च दत्त्वा कालीं पूजयेत् । तद्यथा—'ॐ ऐं सन्ध्यायै नमः । ॐ ऐं सरस्वत्यै नमः । ॐ ऐं त्रिमूर्त्यै नमः । ॐ ऐं कालिकायै नमः । ॐ ऐं सुभगायै नमः । ॐ ऐं उमायै नमः ॐ ऐं कुब्जिकायै नमः । ॐ ऐं काल ङ्कर्षिण्यै नमः । ॐ ऐं अपराजितायै नमः । ॐ ऐं भैरव्यै नमः । ॐ ऐं महालक्ष्म्यै नमः । ॐ ऐं पीठनायिकायै नमः । ॐ ऐं क्षेत्रज्ञायै नमः ॐ ऐं चर्चिकायै नमः ॥ १६ ॥

ततो मूलेन पुष्पाञ्जलित्रयं दत्त्वा, प्रदक्षिणीकृत्य प्रणमेत् ।

कुमारियों की प्रार्थना करे । (कुमारी, त्रिपुरा, कल्याणी, रोहिणी, कामिनी, चण्डिका, शङ्करी, दुर्गा, सुभद्रा दो से दश वर्ष पर्यन्त कुमारियों के नाम हैं । तथा कपूर की बत्ती से कुमारियों की आरती कर दक्षिणा देवे और प्रणाप कर उनका विसर्जन करे ।

अनन्तर 'ॐ ह्रीं हंसः' इत्यादि मन्त्र को तीन बार पढ़कर देवी को तीन बार पुष्पाञ्जलि समर्पित कर महाकाली का 'ॐ ऐं सन्ध्यायै नमः' से 'ॐ ऐं चर्चिकायै नमः' पर्यन्त सोलह मन्त्रों को पढ़कर देवी का पूजन करे । पश्चात् मूल मन्त्र से तीन बार पुष्पांजलि प्रदान कर प्रदक्षिणा एवं प्रणाम करे ।

बलिदानप्रकारः

ततश्छागादिबलिं दद्यात् । तद्यथा—छागं सिन्दूराद्यैरलङ्कृत्य, अर्घ्योदकेन 'दुर्गे दुर्गे रक्षिणि स्वाहा' इति त्रिः प्रोक्ष्य, स्नापयेदनेन ।

'ॐ वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुर्भैरवसागरः ॥ १ ॥
अजस्नाने महेशानि ! सान्निध्यमिह कल्पय ।
पशुपाशविनाशाय हेमकूटस्थिताय च ।
पराय परमेष्ठिने हूङ्काराय च मूर्त्तये' ॥ २ ॥

ततो गन्धोदकेन त्रिः प्रोक्ष्य, कृताञ्जलिः पठेत्—

'ॐ छाग ! त्वं बलिरूपेण महाभाग्यादुपस्थितः ।
प्रणमामि सदा भक्त्या रूपिणं बलिरूपिणम् ॥ १ ॥
चण्डिकाप्रीतिकामस्य दातुरापद्-विनाशिने ।
चण्डिकाबलिरूपाय बले ! तुभ्यं नमो नमः ॥ २ ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः' ॥ ३ ॥

देवी पूजन के बाद छागादि की बलि करे। उसकी विधि इस प्रकार है—छाग को सर्वप्रथम सिन्दूर आदि से अलंकृत कर पूर्वोक्त अर्घ्यं पात्रस्थ जल से 'दुर्गे दुर्गे रक्षिणी स्वाहा' इस मन्त्र को तीन बार पढ़ कर तीन बार उस छाग का प्रोक्षण करे। तदनन्तर 'ॐ वाराही' से 'हूङ्काराय च मूर्त्तये' पर्यन्त दो श्लोक पढ़ कर छाग को स्नान करावे। चन्दन मिश्रित जल से उसे तीन बार प्रोक्षण कर हाथ जोड़ 'ॐ छाग त्वं' से 'वधोऽवधः' पर्यन्त तीन श्लोक पढ़ कर उस छाग की प्रार्थना करे।

ततः पार्श्वपूजा – 'ॐ जयन्त्यै नमः ३। ॐ मङ्गलायै नमः ३। ॐ काल्यै नमः ३। ॐ भद्रकाल्यै नमः ३। ॐ मानस्तोकायै नमः ३। ॐ विजयायै नमः ३। ॐ अपराजितायै नमः ३।' मध्ये 'ॐ अनन्तायै नमः।'

ततः प्रत्यङ्गं पूजयेत्। शिरसि 'रुधिरवदनायै नमः।' कपोले 'चण्डिकायै नमः।' चक्षुषोः 'चन्द्रार्काभ्यां नमः।' कर्णयोः 'बृहस्पतये नमः।' नासायाम् 'सरस्वत्यै नमः। जिह्वायाम् 'उग्रदन्तिकायै नमः।' ग्रीवायां 'महादन्तिकायै नमः।' उदरे 'पृथिव्यै नमः।' जङ्घाचतुष्टये 'घर्माय नमः।' ततो जलं गृहीत्वा, हस्ते 'ॐ ह्रीं श्रीं वरुणमण्डलाधिष्ठितविग्रहायै पशुरूपचण्डिकायै इमं पशुं प्रोक्षामि स्वाहा' इति पशुप्रोक्षणम्।

ततस्तिल-कुश-जलान्यादाय, 'ॐ अद्यामुकमास्यमुकपक्षेऽमुकतिथावमुकगोत्रः श्रीअमुकशर्मा छागसमसङ्ख्यक-वशवर्षा-

---

तदनन्तर 'ॐ जयन्त्यै नमः' से 'ॐ अपराजितायै नमः' पर्यन्त मन्त्र को तीन-तीन बार पढ़ते हुए छाग के पार्श्वभाग का तथा 'ॐ अनन्तायै नमः' मन्त्र पढ़ कर मध्य भाग की पूजा करे। 'फिर उसके प्रत्येक अङ्ग का पूजन करे। जो इस प्रकार है—'रुधिरवदनायै नमः' से 'घर्माय नमः' पर्यन्त्र मन्त्र पढ़ कर क्रमशः सिर, कपोल, दोनों कान, नासिका, जिह्वा, ग्रीवा, उदर तथा चारों पैर के चारों जङ्घों का पूजन करे।

पुनः हाथ में जल लेकर 'ॐ ह्रीं श्रीं' से 'स्वाहा' पर्यन्त मन्त्र पढ़ते हुए उस छाग रूप पशु का प्रोक्षण करे। पुनः हाथ में तिल, कुशा

वच्छिन्न-श्रीमद्दक्षिणकालिकाप्रीतिकामोऽहमेतान् छागान् वह्निदैवतान् भगवत्यै श्रीदक्षिणकालिकायै तुभ्यं घातयिष्ये'। ततो गन्धादिभिः खड्गमर्चयेत्।

'ॐ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम्।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम्॥
रक्ताम्बरधरं चैव पाशहस्तं कुटुम्बिकम्।
पिबमानं च रुधिरं भुञ्जानं कव्यसंहतिम्॥'

'ॐ कालिका कालि वज्रेश्वरीलौहदण्डाय नमः' इति त्रिः सम्पूज्य, सिन्दूरादिना ह्रींकारं विलिख्य, 'खड्गाय नमः' इति सम्पूज्य, बलिकर्णे बलिगायत्रीं श्रावयेत्।

बलिगायत्रीमन्त्रः

'ह्रींबलिरूपाय विद्महे देवीप्रियाय धीमहि। तन्नः पशुः प्रचोदयात्॥'

तथा जल लेकर 'ॐ अद्य' से लेकर 'घातयिष्ये' पर्यन्त वाक्य पढ़कर संकल्प करे। उसके बाद गन्धादि द्वारा 'ॐ कृष्णं पिनाकपाणिं च' से 'लौहदण्डाय नमः' पर्यन्त मन्त्र तीन बार उच्चारण कर तीन बार खड्ग की अर्चना करे। और सिन्दूर से उस पर तीन ह्रींकार लिख कर पुनः 'खड्गाय नमः' मन्त्र बोल कर खड्ग का पूजन करे। तदनन्तर बलि के लिए लाये गये बकरे के कान में 'ह्रींबलिरूपाय' से 'प्रचोदयात्' पर्यन्त बलि-गायत्री के मन्त्र को सुनावे।

ततः खड्गं प्रार्थयेत्—

'ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ।। १ ।।
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ।। २ ।।
रोहिण्यश्च शरीरं ते धाता देवो जनार्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्वदा ।। ३ ।।
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भावशुद्धोऽमर्षणश्च अतितेजास्तथैव च ।। ४ ।।
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः' ।। ५ ।।
'चण्डिकारसनाबुद्धचा एकघाते तु घातयेत् ।
पशुपाशाय विद्महे विप्रकर्णाय धीमहि ।
तन्नश्छागः प्रचोदयात् ।।'

सकलं रुधिरं मुण्डं च देव्यग्रे कृत्वा, समभागेन सम्पूर्णं परमं कविर्दीपयेत् ।

पुनः 'ॐ असिर्विशसनः' से लेकर 'तस्मै खड्गाय ते नमः' पर्यन्त पाँच श्लोक पढ़कर खड्ग की प्रार्थना करे । तलवार को भगवती की जीभ समझ कर एक ही झटके में 'पशुपाशाय' से 'तन्नश्छागः प्रचोदयात्' पर्यन्त मन्त्र पढ़ कर उस बलि के बकरे को काट देवे । और सम्पूर्ण रुधिर तथा मुण्ड को देवी के आगे रख कर समभाग से उसके कवि

मांससमीपज दीपं 'क्रौं क्रौं नमो नमः' अनेन मुण्डे-मुण्डे दीपं दद्यात्ततस्तर्पयेदेभिः । पूर्वे 'चामुण्डां तर्पयामि नमः । दक्षिणे 'योगिनीं तर्पयामि नमः ।' पश्चिमे 'डाकिनीं तर्पयामि नमः' उत्तरे 'भैरवीं तर्पयामि नमः । आग्नेय्याम् 'बिदारिकां तर्पयामि नमः ।' नैर्ऋत्ये 'पापराक्षसीं तर्पयामि नमः ।' वायव्ये 'पूतनां तर्पयामि नमः ।' ईशाने 'कालिकां तर्पयामि नमः । ॐ अद्य दशवर्षावच्छिन्न-श्रीदक्षिणकालिकाप्रीतिकाम इमं छागरुधिरं समुण्डं विष्णुदैवतं भगवत्यै श्रीदक्षिणकाल्यै तुभ्यमहं सम्प्रददे' ।

इति छागदानविधिः ।

(मांस भाग) को भी चमड़े से अलग कर उसे दीपक द्वारा प्रकाशित करे। मांस के समीप में रखे गये उस दीपक को 'क्रौं क्रौं नमो नमः' मन्त्र पढ़ कर प्रत्येक मुण्ड पर रखे। तत्पश्चात् उस मुण्ड से भगवती का तर्पण करे। पूर्व में 'चामुण्डां तर्पयामि नमः' 'दक्षिण में 'योगिनीं तर्पयामि नमः' पश्चिम में 'डाकिनीं तर्पयामि नमः', उत्तर में 'भैरवीं तर्पयामि नमः', अग्निकोण में 'बिदारिकां तर्पयामि नमः', नैर्ऋत्य में 'पापराक्षसीं तर्पयामि नमः', वायव्य में 'पूतनां तर्पयामि नमः', ईशान में 'कालिकां तर्पयामि नमः', मन्त्र पढ़ कर तर्पण करे। तत्पश्चात् 'ॐ अद्य' से 'तुभ्यमहं सम्प्रददे' पर्यन्त संकल्प-वाक्य पढ़ कर भगवती का छाग दान का संकल्प करे।

इस प्रकार छाग बलिदानविधि समाप्त ।

आरार्त्तिकम्

तत आरार्त्तिकम् । तद्यथा कस्मिंश्चित् स्वर्णादिभाजने गोधूमचूर्णपिष्टे कर्पूरमिश्रिता एकादश श्वेतवर्त्तिकाः प्रज्वाल्य, धूपदानविध्युक्तप्रकारेण प्रोक्षणादिकं कृत्वा आरार्त्तिकं दद्यात् । आरार्त्तिकभाजनं 'फट्' इति सम्प्रोक्ष्य, 'नमः' इत्यभ्यर्च्य, 'यम्' इति वायुबीजेन द्वादशवारजप्तेन संशोष्य, वामहस्ततले दक्ष-हस्तपृष्ठं निवेश्य, 'रम्' इति बीजेन संदह्य, वामहस्तपृष्ठे दक्ष-हस्ततलं निवेश्य, 'वम्' इति षोडशवारजप्तेन धेनुमुद्रयाऽमृतीकृत्य, मूलेनाऽष्टशोऽभिमन्त्र्य, 'जयध्वनि मन्त्रमातः स्वाहा' इति घण्टां सम्पूज्य, वामतर्जन्या संस्पृश्य, मूलं पठन् ।

'ॐ कर्पूरवर्त्तिसंयुक्तं वह्निना योजितं च यत् ।
आरार्त्तिकमिदं दिव्यं गृहाण जगदीश्वरि ॥'

बलिदान करने के अनन्तर देवी की आरती करे। किसी स्वर्णादि निर्मित पात्र में गेहूँ के आटे की लोई में कपूर की बनी हुई इग्यारह बत्ती जला कर धूपदान-विधि में कही गयी रीति के अनुसार उस पात्र एवं वर्त्तिका का प्रोक्षण कर आरती करे। आरती के पात्र को 'फट्' इस मन्त्र से प्रोक्षित करे। 'नमः' इस मन्त्र को पढ़ कर, उसका पूजन करे। 'यम्' इस वायु बीज का बारह बार जप कर उसे शोषण करे। पुनः बाँयें हाथ के तलवे पर दाहिने हाथ का पृष्ठ तल रख कर 'रम्' इस अग्नि बीज से उसके दोषों को जलावे तथा बाँयें हाथ के पीठ पर दाहिने हाथ का तलवा रखकर 'वम्' इस अमृत बीज को सोलह बार जप, धेनु मुद्रा से उसे अमृतीकरण कर मूल मन्त्र से आठ बार पात्र को अभिमन्त्रित करे। 'जय ध्वनि मन्त्रमातः' पढ़ कर घण्टा का पूजन कर बाँयें हाथ की तर्जनी अंगुलि से उसका स्पर्श कर मूल मन्त्र पढ़ते हुए 'ॐ कर्पूरवर्त्तिसंयुक्तं' से 'जगदीश्वरि' पर्यन्त मन्त्र तथा पुनः

मूलं च पठन् 'इदमारार्त्तिकं साङ्गायै सायुधायै सबलवाहनायै सपरिवारायै सावरणायै श्रीदक्षिणकालिकां पूजयामि नमः' इति पठन् जलं दत्वा, नेत्रप्रदेशे दशधा भ्रामयेत् ।

पुष्पाञ्जलिः

ततः पुष्पाञ्जलित्रयेण 'सायुध-सवाहन-सपरिवार-महाकालसहित-श्रीदक्षिणकालिकां पूजयामि नमः' इति त्रिः सम्पूज्य, त्रिस्तर्पयेत् । ततो योनिमुद्रादिकं पूर्ववद् दर्शयेत् । ततश्छत्रचामरे दर्शयित्वा, पुष्पाञ्जलिं गृहीत्वा श्लोकचतुष्टयं पठेत् । श्लोको यथा—

'बुद्धिः शरासने क्लृप्ता वर्णनं मङ्गलानि च ।
मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥ १ ॥
ध्वनयो गीतिरूपेण शब्दवाद्यप्रभेदतः ।
छत्राणि तव पद्मानि कल्पितानि मया प्रभो ! ॥ २ ॥
सुषुम्नाध्वजरूपेण प्राणाद्यावाशरात्मना ।
अहङ्कारो गजत्वेन वेगः क्लृप्तो रथात्मना ॥ ३ ॥

मूल मन्त्र पूर्वक 'इदमारार्त्तिकं' से 'कालिकां पूजयामि नमः' पर्यन्त मन्त्र बोल कर जल छिड़क कर नेत्र-स्थान में दश बार आरती को घुमावे ।

पुनः तीन अञ्जलि पुष्प के द्वारा 'सायुध-सवाहन' से 'पूजयामि नमः' पर्यन्त मन्त्र पढ़ कर भगवती का तीन बार पूजन और तीन बार उनका तर्पण करे । तथा पूर्ववत् योनिमुद्रा प्रदर्शित करे । फिर छत्र लगावे एवं चमर डुलावे । पुष्पाञ्जलि लेकर 'बुद्धिः शरासने' से

इन्द्रियाण्यश्वरूपाणि शब्दादीन् रथवर्त्मना ।
मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ।
सर्वमन्यत्तवाक्लृप्तं तवोपकरणात्मना' ॥ ४ ॥
इति पुष्पाञ्जलिं दद्यात्, प्रार्थयेत् ।

इति श्रीमद्दक्षिणकाल्याः सपर्याविधिः सम्पूर्णः ।

नित्यहोमविधिः

ततो नित्यहोमं कुर्यात् । तद्यथा– स्थण्डिले कुण्डे वा मूलेन वीक्ष्य, अस्त्रेण प्रोक्षणताडने कृत्वा, कुशैराच्छाद्य, व्याहृतित्रय-मुच्चार्य, वह्निमानीय, तिस्रो रेखाः संलिख्य, अस्त्रमन्त्रेण नैर्ऋत्ये क्रव्यादांशं परित्यज्य, मूलेनाऽभिमन्त्र्य, 'वम्' इति धेनुमुद्रयाऽ-मृतीकृत्याऽस्त्रेण संरक्ष्य, 'हूम्' इत्यवगुण्ठ्य, परितो भ्रमयन् त्रिः प्रणवं पठन् शय्यागताऽमृतुस्नातां नीलेन्दीवरधारिणीं देवेन

'तवोपकरणात्मना' पर्यन्त चार श्लोक पढ़ कर देवी को पुष्पाञ्जलि देकर प्रार्थना करे ।

इस प्रकार 'शिवदत्ती' हिन्दीव्याख्या सहित काली-रहस्य में
दक्षिणकाली-सपर्य्याविधि समाप्त ।

महाकाली की पूजा कर लेने के पश्चात् नित्य होम करना चाहिए । उसकी विधि इस प्रकार है– स्थण्डिल में अथवा कुण्ड में मूल मन्त्र से अवलोकन एवं अस्त्र मन्त्र से प्रोक्षण तथा ताडन करे । उस पर कुशा बिछावे, तीन बार (व्याहृति ॐ भूर्भुवः स्वः) मन्त्र का उच्चारण कर आग मँगा लेवे । वेदी अथवा कुण्ड में कुशा के द्वारा तीन रेखा लिख कर अस्त्र मन्त्र से नैर्ऋत्य कोण में क्रव्यादों के लिए कुछ अंश छोड़कर मूल मन्त्र से अभिमन्त्रित करे । पुनः 'वम्' इस मन्त्र को पढ़कर धेनु मुद्रा से उसका अमृतीकरण कर अस्त्र मुद्रा से कुण्ड अथवा स्थण्डिल की रक्षा करते हुए 'हूम्' इस मन्त्र से

भुज्यमानां वागीश्वरीं कुण्डे ध्यात्वा, तद्योनिमण्डले ईशरेतो धिया वह्निं 'हूं बह्निचैतन्याय नमः' इति पठन् मूलं च पठन् स्थापयेत् ।

ततो वह्निं पुष्पाऽक्षतादिना सम्पूज्य, तत्र इष्टदेवता-मावाह्य, सम्पूज्य, घृतादिभिर्व्यस्त-समस्ताभिर्महाव्याहृतिभि-राहुतिचतुष्टयं दत्त्वा, स्वकल्पोक्तकरवीरपुष्पैर्घृतादिना वा पञ्चविंशतिसङ्ख्यया स्वाहान्तं मूलमन्त्रमुच्चार्य, तदन्ते चतुर्थ्यन्तं देवताभिधानं स्वाहान्तमुच्चार्य्य जुहुयात् ।

पुनर्व्याहृतिभिर्हुत्वा मूर्त्तौ देवीं नियोज्य, संहारमुद्रया वह्निं विसृज्य, देव्यै आचमनादिकं दद्यात् । चामरादिकं

चारों ओर अग्नि को घुमाकर तीन बार प्रणव 'ॐ' को पढ़कर शय्या पर ऋतु-स्नान के अनन्तर सोयी हुई नील कमल के समान वस्त्र धारण कर शङ्कर के द्वारा रति में लिप्त श्री वागीश्वरी का कुण्ड में ध्यान कर, उसके योनि-मण्डल में ईश्वर के वीर्यभूत उस अग्नि को 'हूं वह्निचैतन्याय नमः' इस मन्त्र से तथा मूल मन्त्र से कुण्ड में स्थापित करे।

पुनः पुष्प, अक्षत आदि से अग्नि का पूजन कर, इसमें इष्ट देवता का आवाहन एवं पूजन करे। तदनन्तर घृतादि द्रव्यों की आहुति एक-एक अलग-अलग महाव्याहृतियों को पढ़कर तथा समस्त को एक ही साथ पढ़ कर चार आहुति प्रदान करे। अथवा स्वकल्पोक्त शाखा के अनुसार करवीर (कनैल) के पुष्पों से अथवा घृत से पचीस आहुति प्रदान करे। मूल मन्त्र के अन्त में स्वाहा लगाकर आहुति देवे।

अन्त में, पुनः व्याहृतियों को लगाकर हवन करे और मूर्त्ति में देवी को स्थापित कर संहार मुद्रा से अग्नि का विसर्जन करे एवं देवी

सम्प्रदर्श्य स्तुत्वा,

'यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे ॥'
इत्यनेन त्रिः प्रदक्षिणं कुर्यात् ।

ततो दण्डवत् प्रणिपत्य, आचमनादिकं पुष्पाञ्जलिं च विधाय, ततो ब्रह्मार्पणाख्येन मनुना आत्मानमर्पयेत् । तद्यथा-अर्पणमन्त्रस्तु—'ॐ इतः पूर्वपापबुद्धि देवधर्माधिकारतो जाग्रत्-स्वप्न-सुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च सकलं देव्यै ते समर्पये ॐ तत्सत् ।

ततः प्राणायामादिकं विधाय, पुष्पाक्षतादिभिः सम्पूज्य क्षमापयेत् । क्षमापनमन्त्रो यथा—

'अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतम् ।
विपरीतं च तत्सर्वं क्षमस्व परमेश्वरि ! ॥ १ ॥

को आचमन आदि प्रदान करे। चँवर डुलावे, स्तुति करे और 'यानि कानि च पापानि' इस मन्त्र को पढ़कर प्रदक्षिणा करे । पश्चात् डण्डे के समान देवी के आगे पृथ्वी पर लोट कर आचमन तथा पुष्पांजलि देकर 'ब्रह्मार्पणं ब्रह्महविः' आदि मन्त्र पढ़ कर अपने को भी श्री भगवती के लिए अर्पित करे । अर्पण का मन्त्र-'ॐ' इतः पूर्वपापबुद्धि' से 'समर्पये ॐ तत्सत्' पर्यन्त है।

उसके बाद प्राणायामादि क्रिया कर पुष्प, अक्षतादि से देवी की पूजा कर 'अज्ञानाद्' से 'प्रसीद परमेश्वरि !' पर्यन्त छह श्लोकों

मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वरि ! ।
सम्पूजिता मया देवि ! तस्मात्त्वं वरदा भव ॥ २ ॥
आवाहनं च पूजां च त्वन्माहात्म्यं जपं तथा ।
विसर्जनं न जानामि कालिके त्वं क्षमस्व मे ॥ ३ ॥
यदक्षरं पदभ्रष्टं स्वरव्यञ्जनवर्जितम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ! ॥ ४ ॥
यस्याः स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति प्रसीद परमेश्वरि ! ॥ ५ ॥
कामेश्वरि जगन्मातः ! सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां सर्वां प्रसीद परमेश्वरि !' ॥ ६ ॥

इत्येतैः पुष्पाञ्जलिना क्षमापयेत् । ततो योनिमुद्रां बद्ध्वा, प्रणम्य,

'ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ! ।
पूजाराधनकाले च पुनरागमनाय च ॥'

इति, मूलमन्त्रं पठन्, संहारमुद्रया देवीं विसृज्य स्वहृदये स्थापयेत् ।

को पढ़कर अपने अपराधों को पुष्पांजलि प्रदान करते हुए क्षमा करावे। और योनि मुद्रा बाँध कर भगवती को प्रणाम करे। 'ॐ गच्छ गच्छ' से लेकर 'पुनरागमनाय च' पर्यन्त श्लोक तथा मूलमन्त्र पढ़ते हुए संहार मुद्रा से देवी का विसर्जन कर, उन्हें अपने हृदय में स्थापित करे।

तत ऐशान्यां दिशि 'ह्रीं चण्डेश्वर्यै नमः' इति चण्डेश्वरीं सम्पूज्य,

'चण्डेश्वरि महादेवि निर्माल्यैश्चन्दनादिभिः ।
लेह्य-चोष्यान्नपानादि - निर्माल्यस्त्रग्विलेपनैः ।
निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया ॥'
इति मन्त्रेण निर्माल्यं दद्यात् ।

ततस्तत्रैवोच्छिष्टचाण्डालिनीं सम्पूज्य, तदुच्छिष्टनैवेद्यासवमुच्छिष्टचाण्डाल्यै दद्यात् । ततो ब्राह्मणान् कुमारींश्च सम्भोज्य, स्वयं प्रसादं भुञ्जीत ।

पुरश्चरणनियमः

पुरश्चरणे स्वयं विशेषः । लक्षसंख्याकजपः तद्दशांशः पूर्वोक्तद्रव्यैः पुरश्चरणपद्धत्युक्तक्रमेण पूर्वोक्तविधिना होमः कर्त्तव्यः । तद्दशांशतः कर्पूरमिश्रिततोयैस्तीर्थतोयैर्मधुना वा

तदनन्तर ईशान कोण में 'ह्रीं चण्डेश्वर्यै नमः' पर्यन्त मन्त्र पढ़ कर चण्डेश्वरी का पूजन करे । पुनः 'चण्डेश्वरि महादेवि' से श्रीशिवाज्ञया' पर्यन्त मन्त्र पढ़ कर भगवती का निर्माल्य चण्डेश्वरी को समर्पित करे । तत्पश्चात् उसी स्थान पर उच्छिष्ट चाण्डालिनी का पूजन कर देवी के उच्छिष्ट नैवेद्य तथा आसव को उच्छिष्ट-चाण्डालिनी के लिए प्रदान करे । उसके बाद ब्राह्मण एवं कुमारियों को भोजन करा कर स्वयं प्रसाद भक्षण करे ।

पुनश्चरण में यह विशेषता है कि, साधक देवी के मन्त्र का एक लाख जप, पूर्वोक्त द्रव्यों से पुरश्चरण-पद्धति में पूर्वोक्त कहे गये विधि के अनुसार होम करे। और उस हवन का दशांश कर्पूर

मूलमन्त्रमुच्चार्य्य, 'दक्षिणकालीं तर्पयामि स्वाहा' एतदुच्चार्य किञ्चित्पात्रे देवतां सम्पूज्य तर्पयेत् ।

पुनः प्राणायामादि विधाय विसर्जयेत् ।

तद्दशांशतो मार्जयेत् । तद्यथा—आत्मानन्ददेवताबुद्ध्या ध्यात्वा, सम्पूज्य मूलविद्यां समुच्चार्य, तदन्ते देवताभिधां द्वितीयां तामुच्चार्य, तदन्ते 'अभिषिञ्चामि नमः' इत्यात्मानमभिषेचयेत् । तद्दशांशब्राणभोजनम् । तदन्ते महतीं पूजां च कुर्यात् ।

इति आचार्य-पण्डित-श्रीशिवदत्तमिश्रशास्त्रिविरचिते काली-रहस्ये दक्षिणकाली-सपर्य्यापद्धतिः सम्पूर्णा ।

मिश्रित जल से, तीर्थ के जल से अथवा मधु से मूल मन्त्र सहित 'दक्षिणकाली तर्पयामि स्वाहा' इस मन्त्र का उच्चारण कर किसी पात्र में देवी का पूजन कर तर्पण करे। तदनन्तर प्राणायामादि कर विसर्जन करे। विसर्जन के उपरान्त तर्पण की संख्या के दशांश संख्या से मार्जन करे। उसकी विधि इस प्रकार है—अपने में स्वयं देवता की बुद्धि रख, मानस पूजा करे। पुनः मूल विद्या का उच्चारण कर देवता के नाम के अन्त में द्वितीया विभक्ति लगाकर 'अभिषिञ्चामि नमः' (ॐ क्लीं महाकालीं अभिषिञ्चामि नमः) मन्त्र पढ़ कर स्वयं अपने को अभिषिक्त करे। तद्दशांश ब्राह्मण भोजन करा कर पुनः विशिष्ट उपचारों से महाकाली का पूजन करना चाहिए।

इस प्रकार आचार्य पण्डित श्री शिवदत्तमिश्र शास्त्रीकृत 'शिवदत्ती' हिन्दीटीका सहित काली-रहस्य में दक्षिणकाली-सपर्य्यापद्धति समाप्त ।

कालिकोपनिषत्

अथ हचैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां कामरेफेन्दिरां समष्टिरूपिणीमादौ तदन्वकर्तुर्बीजद्वयकूर्चवीजं तद्धोमषष्ठस्वरबिन्दु-मेलनं रूपं तदनुभुवना द्वयभूवना तु व्योमज्वलनेन्दिराशून्यमेलनरूपा दक्षिणे कालिके वेत्यभिमुखं गता तदनुबीजसप्तकमुच्चार्य बृहद्भानु-जायामुच्चरेत् ।

अयं सर्वमन्त्रोत्तमोत्तम इमं सकृज्जपन् स तु विश्वेश्वरः स तु नारीश्वरः स तु वेदेश्वरः स सर्वगुरुः सर्वनमस्यः सर्वेषु वेदेष्वधिश्रितो भवति स सर्वेषु तीर्थेषु स्नातो भवति सर्वेषु यज्ञेषु दीक्षितो भवति स स्वयं सदाशिवः त्रिकोणं त्रिकोणं त्रिकोणं पुनश्चैव त्रिकोणं त्रिकोणं ततो वसुदलं सार्द्धचन्द्रकेसरं युग्मशो विलिख्य सम्भृतं भूपुरैकेन युतां सर्वज्ञेनाभ्यर्च्य तस्मिन् देवीदले रेखायां विन्यस्य ध्येया, अभिनव-जलदवदना घनस्तनी कुटिलदंष्ट्रा शवासना वराभय-खड्ग-मुण्ड मण्डितहस्ता कालिका ध्येया, काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्तेति षट्कोणगाः । उग्रा उग्रप्रभा दीप्ता नीला घना बलाका मात्रा मुद्रा मितेति नवकोणगाः, इत्थं पञ्चदश-कोणगाः ।

ब्राह्मी नारायणी माहेश्वरी चामुण्डा कौमारी अपराजिता वाराही नारसिंहीत्यष्टपत्रगाः । चतुष्कोणगाश्चत्वारो देवाः माधव-रुद्र-

विनायक-सौराः । चतुर्दिक्षु इन्द्र-यम-वरुण-कुबेराः । देवीं सर्वाङ्गेनादौ सम्पूज्य;भगोदकेन तर्पणं पञ्चमकारेण पूजनमेतस्याः सपर्यायाः किमधिकं नो शक्यं ब्रह्मादिपदं हेयं हेलया प्राप्नोति एतस्या एक-द्वि-त्रिक्रमेण मनवो भवन्ति नारिमित्रादिलक्षणमत्र वर्तते अमुष्यमन्त्रपाठकस्य गतिरस्ति नान्यस्येह गतिरस्ति एतस्यास्तारा मनोर्दुर्गा मनोर्वा सिद्धिः इदानीं तु सर्वाः स्वप्नभूता असितैव जागर्ति इमामसिताज्ञामुपनिषदं यो वाऽधीते सोऽपुत्रः पुत्रीभवति निर्द्धनो धनायति धर्माऽर्थ-काम-मोक्षाणां पात्रीयत्यन्यस्य वरदः दृष्ट्वा जगन्मोहयति क्रोधस्तं जहाति गङ्गादितीर्थक्षेत्राणामग्निष्टोमादियज्ञानां फलभागीयति ।

इति काली-रहस्येऽथर्वणवेदे सौभाग्यकाण्डे
कालिकोपनिषत्समाप्ता ।

देव्यपराध-क्षमापन-स्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुति-कथाः ।
न जाने मुद्रास्ते तदपि न जाने विलपनं
परं जाने मातस्त्वदनुशरणं क्लेशहरणम् ॥१॥

विधेरज्ञानेन द्रविण-विरहेणाऽलसतया
विधेयाऽशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि! द्रविणमपि भूयस्तव मया ।
तथाऽपि त्वं स्नेहं मयि निरुपमं यत् प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

परित्यक्ता देवा विविधऽविधि-सेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नाऽपि भविता
निरालम्बो लम्बोदर जननि कं यामि शरणम् ॥५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटि-कनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली-भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणि-ग्रहण-परिपाटी-फलमिदम् ॥ ७ ॥

न मोक्षस्याऽऽकांक्षा भव-विभव-वाञ्छाऽपि च न मे
न विज्ञानापेक्षा शशिमुखि-सुखेच्छाऽपि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥

नाऽऽराधिताऽसि विधिना विविधोपचारैः
किं रुक्ष-चिन्तन-परैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब ! परं तवैव ॥ ९ ॥

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः क्षुधा-तृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब ! विचित्रमत्र किं परिपूर्णा करुणाऽस्ति चेन्मयि।
अपराध-परम्परावृतं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि ! यथायोग्यं तथा कुरु ॥१२॥

इति काली-रहस्ये देव्यपराध-क्षमापन-स्तोत्रम्।

जय अम्बे गौरी, मैया जय श्यामे गौरी।
मैया जय मंगलकरणी, मैया जय आनन्दकरणी ॥
तुमको निशिदिन ध्यावत, हरि ब्रह्मा शिवरी ॥ १ ॥ जय अम्बे०
मांग सिन्दूर विराजत, टीको मृदमद को। मैया टीको०
उज्ज्वल से दोऊ नैना, चन्द्रवदन नीको ॥ २ ॥ जय अम्बे०
कनक समान कलेवर, रक्ताम्बर राजै। मैया रक्ता०
रक्त पुष्प गल माला, कण्ठन पर साजै ॥ ३ ॥ जय अम्बे०
केहरि वाहन राजत, खड्ग खप्पर धारी। मैया खड्ग०
सुर नर मुनि जन सेवत, तिनके दुःख हारी ॥ ४ ॥ जय अम्बे०
कानन कुण्डल शोभित, नासाग्रे मोती। मैया नासा०
कोटिक चन्द्र दिवाकर, राजत सम ज्योती ॥ ५ ॥ जय अम्बे०
शुम्भ-निशुम्भ विदारे महिषासुर घाती। मैया महिषा०
धूम्र विलोचन नैना, निशिदिन मदमाती ॥ ६ ॥ जय अम्बे०
चण्ड-मुण्ड संहारे, शोणित बीज हरे। मैया शोणित०
मधु कैटभ दोऊ मारे, सुर भयहीन करे ॥ ७ ॥ जय अम्बे०
ब्रह्माणी रुद्राणी, तुम कमला रानी। मैया तुम०
आगम निगम बखानी, तुम शिव पटरानी ॥ ८ ॥ जय अम्बे०
चौंसठ योगिनी गावत, नृत्य करत भैरों। मैया नृत्य०
बाजत ताल मृदंगा, और बाजे डमरू ॥ ९ ॥ जय अम्बे०
तुम ही जग की माता, तुम ही हो भरता। मैया तुम०
भक्तन की दुःख हरता, सुख-सम्पति करता ॥१०॥ जय अम्बे०
भुजा चार अति शोभित वरदु अभयधारी। मैया वर०
मन वांछित फल पावत, सेवत नर नारी ॥११॥ जय अम्बे०
कंचन थाल विराजत, अगर कपुर बाती। मैया अगर०
श्री मालकेतु में राजत, कोटिरत्न ज्योति ॥१२॥ जय अम्बे०
ये अम्बे जी की आरति, जो कोई नर गावै। मैया जो०
कहत शिवानन्द स्वामी, सुख-सम्पति पावै ॥१३॥ जय अम्बे०

ग्रन्थकारसंस्तवः

देवरिया-जनपदके ख्याते ग्रामे मझौलिकाऽभिख्ये।
उद्भटशूरा मल्ला यत्राऽऽसन् विश्वविख्याताः ॥ १ ॥
विद्या-सदाचारगुण-प्रसिद्धा लोकद्वयी साधनकर्मसिद्धाः।
यत्राऽभवँल्लोक - ललामभूता, विप्रा जगद्वन्दित-पादपद्माः ॥ २ ॥
पितामहोऽभून्मम लोकवित्तः, श्रीकान्तनामा-ऽऽगममर्म-विज्ञः।
तदात्मजौ द्वौ परमार्थनिष्ठौ, जातौ प्रतीक्ष्याऽर्चनरक्तचित्तौ ॥ ३ ॥
श्रीसन्तशरणनामा ज्यायानासीन्नितान्त-विख्यातः।
शास्त्राऽनुशीलनपरः शुभकर्मपरायणः सततम् ॥ ४ ॥
श्रीसत्यनारायणनामधेय आसीत्कनीयाञ्शुभभागधेयः।
द्वावप्यभूतां पितृभक्तिभाजौ, लोकोपकारे परमप्रवीणौ ॥ ५ ॥
श्रीसन्तशरणविदुषो द्वौ पुत्रौ भक्तिसम्पन्नौ।
श्रीलजगन्नाथ इति ज्यायानासीद् गुणाऽग्रणीर्धीमान् ॥ ६ ॥
तदनुजनुर्गुरुभक्तः शिवदत्तोऽहं समाख्या प्रथितः।
पित्रोः परिचरणपरः शास्त्राऽम्बुधिमज्जने रसिकः ॥ ७ ॥
वागीश्वरी नाम ममाऽऽद्यपत्नी,सावित्रिकाया प्रसवित्रिकाऽऽसीत्।
सा द्रौपदी नाम मदन्यपत्नी, पुष्पाप्रसूर्द्वे अपि मुक्तिभाजौ ॥ ८ ॥
पौरस्त्य-पाश्चात्त्य-विशिष्टविद्या कलाप्रवीणस्य विचक्षणस्य।
सत्यव्रतस्याऽस्ति कलत्ररत्नं सावित्रिका नाम मदीयकन्या ॥ ९ ॥
कनीयसी मे दुहिताऽस्ति पुष्पा, श्रीमद्-रमेशाख्यबुधस्य पत्नी।
उभे मदीये तनये स्वधर्मं, सम्पाद्य सौभाग्य-समन्विते स्तः ॥१०॥
आचार्योऽहं शब्दशास्त्रे तथैव, साहित्याऽब्धिर्ग्रन्थनिर्माणशीलः।
तन्त्रे, स्तोत्रे, व्याकृतौ धर्मशास्त्रे,सन्ति ग्रन्था निर्मिता मामकीनाः ॥११॥
अद्याऽवधि ग्रन्थशताऽधिकं मे प्रकाशितं भूरिपरिश्रमेण।
अशान्तयत्नेन कृतिं करोमि शास्त्रोक्तकृत्यं विदधामि नित्यम् ॥१२॥
स्वचित्त-शिष्टा-ऽऽस्तिक-तोषणाय निरन्तरं शास्त्रचयं समीक्ष्य।
मया प्रणीता विविधाः प्रबन्धाः संप्रार्थये तत्र सतां सुदृष्टिम् ॥१३॥

क्षमा-प्रार्थना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ! ॥ १ ॥
आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ! ॥ २ ॥
यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम्।
निवेदितं च नैवेद्यं तद्-गृहाणाऽनुकम्पया ॥ ३ ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि !।
यत्पूजितं मया देवि ! परिपूर्णं तदस्तु मे ॥ ४ ॥
अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ५ ॥
अज्ञानाद् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम्।
तत्सर्वं क्षम्यतां देवि ! प्रसीद परमेश्वरि ! ॥ ६ ॥
कामेश्वरि ! जगन्मातः सच्चिदानन्दविग्रहे।
गृहाण त्वं स्तुतिमिमां प्रसीद परमेश्वरि ! ॥ ७ ॥
गतं पापं गतं दुःखं गतं दारिद्र्यमेव च।
आगता सुख-सम्पत्तिः पुण्याच्च तव दर्शनात् ॥ ८ ॥
यदत्र पाठे जगदम्बिके मया, विसर्ग-बिन्द्वक्षर-हीनमीरितम्।
तदस्तु सम्पूर्णतमः प्रसादतः, सङ्कल्पसिद्धिश्च सदैव जायताम् ॥ ९ ॥
मोहादज्ञानतो वा पठितमपठितं, साम्प्रतं ते स्तवेऽस्मिन्।
तत्सर्वं साङ्गमास्तां भगवति वरदे !, त्वत्प्रसादात् प्रसीद ॥१०॥
यस्याऽर्थं पठितं स्तोत्रं तवेदं शङ्करप्रिये !।
तस्य देहस्य गेहस्य शान्तिर्भवतु सर्वदा ॥११॥

इति काली-रहस्ये क्षमा-प्रार्थना समाप्ता।

इति देवरिया - मण्डलान्तर्गत - 'मझौली राज्य' (सम्प्रति वाराणसी) वास्तव्येन पण्डितश्रीसन्तशरणमिश्रात्मज-**आचार्य-पण्डित-श्रीशिवदत्त-मिश्रशास्त्रिणा** 'शिवदत्ती' हिन्दीव्याख्यया विभूष्य प्रणीतं सम्पादितं च काली-रहस्यम् समाप्तम्।

❀

आचार्य पण्डित श्री शिवदत्त मिश्र शास्त्री द्वारा सम्पादित

हमारे नवीनतम प्रकाशन

वास्तुशान्तिपद्धतिः। 'शिवदत्ती' हिन्दी टीका सहित ३०-००

मूलशांतिपद्धतिः। 'शिवदत्ती' हिन्दी टीका सहित २०-००

चाणक्यनीतिदर्पणम्। 'शिवदत्ती' हिन्दी टीका सहित २०-००

रामरक्षास्तोत्र। 'शिवदत्ती' हिन्दी व्याख्या एवं रामकवच, रामहृदय, रामगीता, रामचन्द्राष्टक, रामचन्द्रस्तुति, रामप्रातःस्मरण तथा आरती सहित ४-००

कनकधारा-लक्ष्मीस्तवराजस्तोत्र। 'शिवदत्ती' हिन्दी टीका तथा धनदालक्ष्मीस्तोत्र-सिद्धिलक्ष्मीस्तोत्र, श्रीसूक्तादि विभूषित ५-००

उड्डीशतन्त्र। 'शिवदत्ती' हिन्दी व्याख्या एवं विशिष्ट भूमिका सहित २०-००

दत्तात्रेयतन्त्र। 'शिवदत्ती' हिन्दी व्याख्या सहित २०-००

हनुमान-चालीसा। बजरंगबाण, आरती, रामस्तुति, रुद्राष्टक, हनुमदवडवानलस्तोत्र तथा सम्पुट-विधान सहित ५-००

दुर्गा-चालीसा। देवीसूक्त, सप्तश्लोकीदुर्गा, देव्यपराधक्षमापनस्तोत्र एवं देवी-आरती सहित २-००

शिव-चालीसा। विश्वनाथाष्टक, शिवप्रातःस्मरण, रुद्राष्टक, भोलेनाथस्तुति, आरती तथा क्षमा-प्रार्थना आदि सहित २-००

पुरुषोत्तममासमाहात्म्य। 'शिवदत्ती' हिन्दी टीका सहित ४५-००

तारा-रहस्यम्। 'शिवदत्ती' हिन्दी व्याख्योपेतम् ३०-००

Rs. 25.00

Also can be had from

Chowkhamba Sanskrit Series Office

K. 37/99, Gopal Mandir Lane
Near Golghar (Maidagin)
Post Box 1008, Varanasi-221 001 (U.P) India
Phone : Office : (0542) 2333458, Res. : (0542) 2334032 & 2335020
Fax : (0542) 2333458, e-mail : cssoffice@satyam.net.in
Web site : www.chowkhambaseries.com

Price : Rs. 75.00

ISBN : 81-218-0193-1

designed by Shreyashi GRAPHICS, mo. 9839814784

SVB
S.No
Subj
Sub.